7th Edition. 2,000 Copies.



# ॥ कथाकुसुममञ्जरी ॥

A

NOSEGAY

OF

# MORAL STORIES



PART I.

BY

**S. VENKATARAMA SASTRI,**

*Senior Sanskrit Pandit,*

**Town High School, Kumbakonam.**

STABAKAS 1 and 2.



SRIRANGAM:

SRI VANI VILAS PRESS.

1917.

Price As. 7.] [Post Extra.

॥ श्रीः ॥

# ॥ कथाकुसुममञ्जरी ॥

## ॥ प्रथमः स्तबकः ॥

### कथा १.

नीचाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः ।
ईशाश्रयो महानागः पप्रच्छ गरुडं सुखम् ॥

कदाचित्कैलासवासी भगवान्पार्वतीपतिः स्नानार्थं जाह्नवीं गतः । तदा तस्य जटाभरणं कोऽपि नागो व्योम्नि डयमानं भगवन्तं गरुडमपश्यत् । दृष्ट्वा च मनस्येवमाचिन्तयत्– 'अहो अयं किलास्माकमस्मदीयानां च सहजवैरी। अनेन बहवोऽस्मदीया व्यापादिताः । अतश्च बहोः कालादस्मिन्बद्धवैरोऽहम् । अद्य भगवदाश्रयं मां नायं शत्रुः प्रहर्तुं शक्तः । अतः शक्यमिदानीमेनं वैरिणमवमन्तुम्' इति । एवमालोच्य सावहेलं

तमपृच्छत्— 'भगवन्वैनतेय, अपि कुशलं भवतः सकुटुम्बस्य?' इति। तद्वचनं भगवतो वैनतेयस्य नितान्तं लज्जावहमभवत्। तथापि भगवदाश्रयं तं नागं प्रहर्तुमशक्नुवन्, मन्त्रेण रुद्धवीर्यो [1]भोगीव, अन्तर्दह्यमानो गतः। नागोऽपि परमां संतुष्टिमलभत। अतो महदाश्रय एव कर्तव्यः॥

---

## कथा २.

**देवतानां प्रसादेन सुखं जीवन्ति मानवाः।**
**अभावे तत्प्रसादस्य मूलोच्छेदमवाप्नुयुः॥**

पुरा किल सर्वे पर्वताः पक्षवन्तोऽभवन्। ते च विहङ्गमा इव विहायसा गच्छन्तः, स्वच्छन्दं यत्र कुत्रापि ग्रामे नगरे वोपविशन्तः, महान्तमुच्छेदं प्राणिनामजनयन्। तत्परिज्ञाय भगवान्वज्रपाणिः पुरंदरो भुवमाजगाम। आगत्य च शितधारेण वज्रेण पर्वतानां पक्षच्छेदने प्रावर्तत। तथा प्रवृत्तं तमालोक्य भीताः केचित्पलायितुमारभन्त। केचिच्च [2]शिला-

---

1. 'राजा स्वतेजोभिरदह्यतान्त-
भोगीव मन्त्रौषधिरुद्धवीर्यः।' इति रघुः।

2. 'पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः।' इति रघुः।

वर्षिणः प्रतियोद्धुम् । अथाकुण्ठशक्तिर्भगवाँल्लोकानुग्रहणाय बलात्कारेण तेषां पक्षांश्छित्त्वा सपक्षानपि तान्विपक्षांश्चकार । मैनाकस्तु भयात्समुद्रे निलीनोऽद्यापि नोन्मज्जति । अत एवाहुः—

**पादपानां भयं वातः पद्मानां शिशिरो भयम् ।**
**पर्वतानां भयं वज्रः साधूनां दुर्जनो भयम् ॥** इति ।

अतो मानवैः प्रयत्नेन देवतानां प्रसादोऽवश्यं संपादनीयः ॥

---

## कथा ३.

**दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ।**
**दैवेन रक्षितः सर्पो मूषकश्च विनाशितः ॥ ४ ॥**

कोऽपि जाङ्गलिको वृत्त्यर्थं कमपि सर्पं वने जग्राह । तं च सर्पपेटिकायां निरुध्य गृहमनयत् । प्रत्यहमाहारदानेन पोषयंस्तेन वृत्तिमकरोत् । कदाचित्पेटिकानिरुद्धं तं गृहे निक्षिप्य ग्रामान्तरं गतः । कार्यवशेन च पञ्चषाणि दिनानि यावन्नागतः । सर्पस्त्वाहाराभावेन कृशो म्लानेन्द्रियश्च जातः । मञ्जूषायां निरुद्धो बहिर्गन्तुं च न शक्तोऽभवत् । क्रमेण च जीविते

निराशो जातः। अस्मिन्नवसरे कोऽपि मूषको नक्तमाहारार्थं तत्र तत्र संचरन्मञ्जूषायाः सकाशमागतः। [1]भक्ष्याशया च मञ्जूषायां विवरं कृत्वान्तः प्रविष्टः। हन्त! सर्पस्तं भक्षयित्वा तृप्तस्तेनैव विवरेण निर्गत्य यथेच्छं गतः। अतो दैवमेव भूतानां बन्धमोक्षयोः कारणं भवति॥

---

## कथा ४.

[2]दुर्दैवः पुरुषो यत्र याति तत्रैव चापदः।
तालभग्नशिराः कोऽपि खर्वाटोऽत्र निदर्शनम्॥५॥

कोऽपि खर्वाटो नरः कार्यवशेन मध्याह्ने किंचिद्ग्रामान्तरं प्रस्थितः। पथि गच्छन्कठोरैस्तपनकिरणैः संतापितमस्तकोऽभवत्। छायामपेक्षमाणोऽपि समीपे वृक्षाभावेन तां नालभत। अथ क्रोशमात्रमध्वानं गत्वा कंचित्तालवृक्षमपश्यत्। तेन च संतुष्यन्धैर्यमवलम्ब्य द्रुतगतिस्तस्य मूलं गतः। तदानीं बृहत्किंचित्तालफलं पाकवशेन वृन्ताच्छ्लथमभवत्। तच्च

---

1. 'भक्ष्याशयाहिमञ्जूषां दृष्ट्वाखुस्तेन भक्षितः।' इति चन्द्रालोके।
2. 'प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः।' इति भर्तृहरिः।

वातेन चालितं दुर्दैववशाल्लुप्तलोमनि तस्य मस्तके पतितम् । तेन च सूर्यकिरणैस्तापितं तस्य मस्तकं सशब्दं भग्नम् । भग्नमस्तकश्च व्यथामसहमानो मूर्छितो भूमौ निपतितः । अहो ! किं क्रियताम् ! । छिद्रेष्वनर्था बहुलीभवन्ति ॥

---

## कथा ९.

अलाभाद्दोषमारोप्य वाञ्छितेष्वपि वस्तुषु ।
विरक्ता इव चेष्टन्ते द्राक्षाजम्बुकवन्नराः ॥ ९ ॥

कोऽपि जम्बुको वनाद्वनमाहारार्थमटन्किंचिद्द्राक्षामण्डपमपश्यत् । तत्र च पक्वानि द्राक्षाफलानि विलोक्य चिन्तयति स्म— 'अहं तावद्द्राक्षाप्रियः । मत्पत्नी तु मत्तो द्विगुणम् । '[1]एकः स्वादु न भुञ्जीत' इति च प्राज्ञाः कथयन्ति । अतः पत्न्या सहैमानि फलानि यथातृप्ति भक्षयिष्यामि । अनेन मयि तस्या अनुरागोऽपि महान्भविष्यति ।' इति । एवं चिन्तयित्वा द्राक्षागुच्छं लक्ष्यीकृत्यो[2]द्बाहुरसकृदुत्पतति स्म । परं मण्डपस्योन्नतत्वात्तन्नालभत । अथ गुच्छान्तरं संलक्ष्योत्पतितः । तदपि न

---

1. एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात् ।
एको न गच्छेदध्वानं नैकश्चार्थान्प्रचिन्तयेत् ॥
2. 'प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ।' इति रघुः ।

लभ्यते स्म । एवं बहुवारं प्रयत्यापि फलमेकमप्यलभमानः श्रान्तः । अथ तानि दुर्लभानि मत्वान्तर्लज्जितोऽपि बहिः 'धिगिमान्यम्लानि फलानि ।' इति वदन्स्वच्छन्दं गतः । अतो दुर्लभे वस्तुनि जनाः प्रायो दोषमुद्भावयन्ति, विरक्तिं च प्रदर्शयन्ति ॥

---

## कथा ६.

स्वचित्तकल्पितो गर्वः कस्य नाम न विद्यते ।
उत्क्षिप्य टिट्टिभी पादौ शेते भङ्गभयाद्दिवः ॥ ७ ॥

कस्मिंश्चिद्वने तिन्त्रिणीपादपे कृतकुलायौ टिट्टिभदंपती वसतः । तौ च प्रत्यहं तत्र तत्र चरन्तावुदरमापूर्य सायं निवासनीडं समागच्छतः । कुत्रापि रजन्यां निद्रोन्मुखयोस्तयोरतर्कितोपनतेन संशयेन टिट्टिभष्टिट्टिभीमभाषत— 'प्रिये, निद्राणयोरावयोः कदाचिद्भग्नमाकाशं पतितं चेदावां किं कुर्वः ?' इति । तच्छ्रुत्वा टिट्टिभी प्राह— 'प्राणनाथ, युक्तमुक्तं भवता । कदा कस्य किं भविष्यतीति केन वा ज्ञायते । कदाचिदाकाशं भग्नं पतेदपि । सर्वथा भूमौ वसद्भिर्जागरूकैर्भवितव्यम्' इति । अथावाभ्यां किं क्रियताम् ? इति सो-

ऽपृच्छत् । ततः सा प्राह—'प्राणनाथ, मास्तु तेऽत्र चिन्ता । सुदृढं मामालिङ्ग्य निद्रासुखमनुभूयतां भवता । अहमुत्ताना पादावुत्क्षिप्य निद्रां करोमि । कदाचिदाकाशं पतितं चेन्मम पादौ धारयिष्यतः ।' इति । तच्छ्रुत्वा स चिन्तां विहाय निद्राति स्म । साप्युत्ताना पादावुत्क्षिप्य निद्रामकरोत् । अहो पश्यत विहगाङ्गनाया गर्वम् ॥

---

## कथा ७.

**असत्यवादिना प्रोक्तं सत्यमप्यनृतं भवेत् ।**
**असत्यवादिबालोक्तं शार्दूलागमनं यथा ॥ ८ ॥**

व्याघ्रपुरे विष्णुगुप्तो नाम कोऽपि विप्रोऽभवत् । तस्य गोपालो नाम तनयः । स कदाचिद्गोपालेन सह महोत्सवदर्शनार्थं काञ्चीपुरं प्रस्थितः । मध्ये च वनमार्गेण गमनं संवृत्तम् । सुदूरगमनेन गोपालः श्रान्तः । पादयोस्तस्य व्यथा जाता । तस्य पिता तु वेगेनाग्रतोऽगच्छत् । पितरमनुगन्तुमशक्तः स मृषैव पितरमेवमवदत्—'तात व्याघ्र आगच्छति व्याघ्र आगच्छति ।' इति । तच्छ्रुत्वा विष्णुगुप्तः परावृत्यापश्यत् ।

तदा व्याघ्रो नैवासीत्। ततस्तस्मिन्नग्रतः किंचिद्दूरं गते व्याघ्रः कोऽप्यागतः। तं दृष्ट्वा भीतो गोपालः पितरं संबोध्य 'तात, शार्दूलः शार्दूलः' इत्युच्चैराक्रोशत्। विष्णुगुप्तस्तु पुरेवायं मृषा वदतीति मन्यमानोऽपरावर्तमान एव गच्छति स्म। अथ व्याघ्रः समागत्य गोपालमादाय गतः। अतः—

सत्यमेव सदा भाष्यमसत्यं न कदाचन।
असत्यभाषी गोपालो यतो व्याघ्रेण भक्षितः॥ ९॥

---

## कथा ८.

न जातु युज्यते बाला धृष्टता दुष्टता च वः।
धृष्टो दुष्टश्च गोविन्दो यतो दष्टो महाहिना॥ १०॥

गोविन्दनामा द्वादशवर्षः कोऽपि बालः स्नानार्थं नदीं प्रस्थितः। मार्गमध्ये कमपि सर्पमवालोकयत्। स चैनं दृष्ट्वा भीतः पलायितुमारभत। तदा धृष्टो दुष्टश्च गोविन्दस्तस्योपरि पाषाणखण्डमेकं प्राक्षिपत्। तच्च दैववशाल्लक्ष्यादपराद्धमभवत्। तज्जानन्नपि सर्पो भयादपरावर्तमान एव पलायते स्म। अथ गोविन्दः पुनरपि शिलाखण्डमेकं प्रक्षिप्तवान्। तेन

प्रहृतः सर्पः [1]क्रोधमाविशन्निवृत्य हन्त गोविन्दमदशत् । दष्टमात्र एव संजातभयो गोविन्दः सर्पदष्टमात्मानमुद्घोषयन्सत्वरं गृहं प्रधावितः । विषवेगेण च मूर्छितो जातः । अत्रान्तरे कोऽपि मान्त्रिको यदृच्छया तत्राजगाम । स च तस्य बान्धवैः प्रार्थितः प्राङ्मुखो भूत्वा यथाविधि गारुडं मन्त्रमजपत् । क्रमेण भगवान्गरुडः प्रसन्नः । विषवेगश्च शान्तः । दिष्ट्या च गोविन्दो निर्मोहः स्वस्थो बभूव । साधु चेदमुच्यते--

**निमग्नस्य पयोराशौ पर्वतात्पतितस्य च ।**
**तक्षकेणापि दष्टस्य चायुर्मर्माणि रक्षति ॥११॥** इति ।

---

## कथा ९.

**न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित् ।**
**काकस्य [2]सहवासेन विनष्टो राजहंसकः ॥ १२ ॥**

अस्ति पम्पायाः समीपे महान्प्लक्षतरुः । तत्र कदाचिन्मध्याह्ने सह काकेन कश्चन हंसः समागत्य शाखायां समुपविष्टः । तस्मि-

---

1. 'अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ।' इति रघुः ।

2. सहस्थित्या ।

न्नेव समये कुतोऽपि देशात्स्वदेशं गच्छन्कोऽपि पान्थो नितान्तं श्रान्तो हस्तयष्टिं पार्श्वे निक्षिप्य तच्छायायां सुप्तः । क्रमेण सूर्यापगमात्पत्रान्तरालेनातपः पान्थस्य मुखमस्पृशत् । आतपव्याप्तं सुप्तस्य मुखमुपलक्ष्य शाखास्थितो हंसः कृपया स्वपक्षौ प्रसार्य तन्मुखे च्छायामजनयत् । पान्थोऽपि श्रमपरवशतया निर्भरं निद्रासुखमनुभवन्मुखं व्यादाय सुप्तः । तदा परसुखासहिष्णुः काकः स्वाभाविकेन दौर्जन्येन पान्थमुखे पुरीषोत्सर्गं कृत्वा पलायितः । अथासौ पान्थः प्रबुध्योर्ध्वं दत्तदृष्टिर्हंसं व्यलोकयत् । अथ तमेवोपकारिणमपराधिनं मन्यमानः पार्श्वस्थां यष्टिमादाय व्यापादितवान् । अतो दुर्जनेन समं क्वापि न स्थातव्यम् ॥

---

## कथा १०.

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित् ।
काकस्य [1]सहवासेन विनष्टो वर्तकः पुरा ॥ १३ ॥

पुरा भगवतो गरुडस्य यात्रायां सर्वे पक्षिणः समुद्रतीरं प्रस्थिताः । तदानीं मन्दगतिः कोऽपि वर्तकः काकेन समं प्रच-

---

1. सहगमनेन ।

लितः । मार्गमध्ये शिरसि दधिभाण्डं वहन्कोऽपि गोपालस्ताभ्यां दृष्टः । दृष्ट्वा च काको व्यचिन्तयत्– 'मूढोऽयं गोपालो विवृतमुखं दधिभाण्डं शिरसि वहति । तदाकाशस्थोऽहमनेनालक्षित एव दधिखण्डानि यथातृप्ति भक्षयामि' इति । अथ तेन दुर्जनेनासकृत्तथा क्रियमाणे महान्कोपो गोपालमाविशत् । अनन्तरं दधिभाण्डं भूमौ निधाय यावदूर्ध्वमवलोकते तावत्काको वर्तकश्च तेन दृष्टौ । ततो लोष्टैः प्रहर्तुं प्रवृत्ते तस्मिन्द्रुतगतिः काको महता वेगेन पलायितः । निरपराधो वर्तकस्तु मन्दगतिः कोपाविष्टेन तेन प्राप्तः, हन्त! व्यापादितश्च । साधु चेदमुच्यते—

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत्सीतां बन्धं प्राप्तो महोदधिः ॥ १४ ॥

इति । अतो दुर्जनेन समं न क्वापि गन्तव्यम् ॥

---

## कथा ११.

अतिलोभो न कर्तव्यो लोभं च न परित्यजेत् ।
अतिलोभाभिभूतस्य करस्थमपि नश्यति ॥ १५ ॥

कोऽपि जम्बुकश्चिरमाहारार्थं तत्र तत्र भ्रमति स्म । परं

किमपि सत्त्वं तेन नासादितम् । अथ निराशो निवर्तमानो दिष्ट्या कमप्यजशिशुमपश्यत् । तं च बलात्कण्ठे गृहीत्वा व्यापाद्य मुखेनादाय नदीतीरेण गृहाभिमुखं गतः । तदा नद्यास्तीरोपान्ते शयानं कमपि नक्रमवालोकयत् । असंतुष्टः स मूढस्तमवलोक्य सद्यो मुखस्थमजमांसं भूमौ निक्षिप्य तमुपासर्पत् । उपसर्पन्तं तं दृष्ट्वा जागरूकः स मकरः सहसा प्रवाहं प्राविशत् । अथ वञ्चितः स वञ्चकः खिन्नः क्षणं तत्र स्थित्वा निराशो निवृत्तः । अत्रान्तरे कुतोऽपि कोऽपि गृध्रः समागत्याजमांसमप्यपाहरत् । अथ तदप्यलभमानो नितान्तं खिन्नः स्वबुद्धिं च निन्दन्निराहारः स्वावासं गतः । साधु चेदमुच्यते--

ध्रुवं वस्तु परित्यज्य योऽध्रुवं वस्तु सेवते ।
ध्रुवाध्रुवे उभे तस्य विनश्येतां न संशयः ॥ १६ ॥

इति । अतोऽतिलोभः संत्याज्यो भवति ॥

---

## कथा १७.

वस्त्रेणैव पुमाँल्लोके पूजनीयतमो भवेत् ।
सूक्ष्मवस्त्रधरो विद्वान्धनिकेनाभ्यपूज्यत ॥ १७ ॥

दरिद्रः कोऽपि विद्वान्कस्यचिद्धनिकस्य गृहं भोजनायागच्छत् । जीर्णवस्त्रधारिणं तमवलोक्य धनिको वाचापि नोपा-

चरत्। अथ स विद्वान्स्ववस्त्रमेव तत्र कारणं मन्यमानः परेद्यवि सूक्ष्मं निर्मलं च वस्त्रं परिधाय तस्यैव गृहं गतः। धनिकस्तु प्रत्युत्थाय करेण तस्य करं गृहीत्वा धन्यवादेन तं मानितवान्। अथ च पाद्यमाचमनीयं च दत्त्वा भोजनाय महानसमुपानयत्। विद्वांस्तु भोजनादौ स्वोत्तरीयं भूमौ प्रसार्य द्वित्रान्कवलांस्तत्र न्यक्षिपत्। तदवलोक्य धनिकः 'किमेवं क्रियते?' इति पण्डितमपृच्छत्। स तु बुद्धिमान् 'धनिक, पूर्वेद्युर्जीर्णमलिनवस्त्रधारी समागतोऽहम्। तदा वाङ्मात्रेणापि भवता न संमानितः। अद्य त्वस्य वाससः प्रभावेण बहूनां भवदीयसत्काराणां पात्रमभवम्। अतः कृतज्ञोऽहं वस्त्रमादौ भोजयामि। पश्चादहं भोक्ष्ये' इति। तच्छ्रुत्वा धनिकः किंचिदिव लज्जितोऽभवत्। साधु चेदमुच्यते—

वस्त्रेण वपुषा वाचा विद्यया विनयेन च।
वकारैः पञ्चभिर्हीनो नरो नायाति गौरवम् ॥ इति ॥

---

## कथा १३.

प्रत्युत्पन्नधियो धीरास्तरन्त्यापदमागताम्।
तेन्नालरामः कूपान्तः शिलाप्रक्षेपणादिव ॥ १९ ॥

दाक्षिणदेशे तेन्नालरामो नाम कश्चन सुधीरासीत् । केऽपि चोरा रात्रौ तद्गृहं प्रविश्य कुत्रापि निलीय स्थिताः । तदवबुध्य स सुधीः सर्वं वित्तजातं भूगृहे निगूह्य भार्यामाहूयाभाषत— 'प्रिये, चोरभयमेषु दिवसेषु बहुधा श्रूयते । तद्वित्तजातं सर्वं निष्कुटस्थे कूपे निक्षिपावः' इति । सापि धीमती भर्तुर्हृदयं विज्ञाय बाढमित्याह । अथ स धीमान्कामपि पेटिकां शिलाशकलैरापूर्य रज्जुभिर्दृढं बद्ध्वा गभीरे तस्मिन्कूपे सधढात्कारं प्राक्षिपत् । तं च महान्तं शब्दमाकर्ण्य मूढास्तस्कराः कूपसमीपं गत्वा वित्तलोभात्स्वेषु कंचित्कूपमवातारयन् । स तु तां पेटिकामुद्धर्तुं न शशाक । अथ सर्वे मिलित्वा तत्रस्थेन घटीयन्त्रेण जलान्युद्धर्तुमयतन्त । सुधीरपि तद्विज्ञाय तैरलक्षित एव तज्जलं निष्कुटपादपानामुपयोक्तुमारभत । क्रमेण तैः कूपजलं निःशेषमुद्धृतम् । आलवालानि च पादपानां जलैः पूर्णानि । अन्ते च ते मूढाः कूपस्थां शिलाशकलैरापूर्णां पेटिकां दृष्ट्वा वञ्चिता यथागतं गताः । सुधीरप्येवं तान्वञ्चयित्वा कृतकृत्योऽभवत् ॥

---

## कथा १४.

पुत्रस्य हितमन्विच्छेत्प्रसूरेव न चेतरा ।
निदर्शनं तु मीनाक्षी हरदत्तवधूरिह ॥ २० ॥

मगधेषु हरदत्तो नाम कोऽपि विप्रोऽभवत् । तस्य मीनाक्षी कामाक्षीति द्वे भार्ये आस्ताम् । मीनाक्षी सुरूपं सुतमेकमसूत । जातमात्रे सुते हरदत्तः कालवशेन परलोकं गतः । अथ ते सपत्न्यौ कंचित्कालं वैषम्यं विना तं शिशुं प्रीत्यापोषयताम् । अथ कदाचित्तयोः शिशुमधिकृत्य विवादो जातः । कनीयसी कामाक्षी तं बालं स्वात्मजातं व्याहरन्ती तमादायान्यत्र गन्तुमारभत । ज्यायसी मीनाक्षी च 'अहमेवास्य प्रसूः । तदेनं मा स्पृश ।' इति तां रुरोध । इत्थं परस्परं कलहायमाने ते सह सुतेन न्यायसभां गते । न्यायाधिपश्चासाक्षिकं तयोर्विवादं श्रुत्वा युक्त्या तत्त्वमवगन्तुमिच्छन्सेवकमाहूय 'इमं बालं द्वेधा कृत्वा द्वाभ्यां प्रयच्छ' इत्यादिशत् । तदा कामाक्षी 'न्याय्यमेतत् । एवं क्रियताम् ।' इत्याह । मीनाक्षी तु भीता 'न्यायाधिप, मैवं क्रियताम । मास्तु ममायं बालः । अस्या एव भवतु' इति सानुनयं प्रार्थयत । तच्छ्रुत्वा धीमान्न्यायाधिपः 'ज्यायस्येव शिशोः प्रसूः' इति निर्णीय तस्यै शिशुं दत्त्वा कनीयसीं कारायां रोद्धुं भृत्यानादिशत् ॥

## कथा १५.

अत्युन्नतपदं प्राप्तः पूज्यान्नैवावमानयेत् ।
नहुषः शक्रतां प्राप्तश्च्युतोऽगस्त्यावमाननात् ॥२१॥

पुरा किल चन्द्रवंश्यो नहुषनामा कोऽपि भूपो बभूव । स सर्वाः प्रजाः स्वाः प्रजा इव पालयञ्शतमश्वमेधानाजहार । चिरमिह भुक्तभोगो जीवितान्ते दिवमारुरोह । तत्र च शताश्वमेधफलभूतं प्रभूतभोगवैभवं देवराज्यं प्राप । तेन च श्रीमदान्धः सप्तर्षीन्स्वारूढां शिबिकां वाहयामास । तेष्वन्यतमो वामनाकृतिरगस्त्योऽपि तस्य शिबिकावाहको बभूव । अथ कदाचित्कामपीडितः स देवराजः शिबिकामारुह्य पौलोम्याः सदनं प्रतस्थे । वामनेनागस्त्येन प्रांशुभिरन्यैश्चोह्यमाना शिबिका भृशं विचचाल । तदसहमानो नहुषो महर्षीनुच्चावचैर्दुर्वचनैर्निन्दन्वामनतया मन्दगमनमगस्त्यम् 'सर्प सर्प' इति त्वरयामास । ततो जातकोपो महर्षिः श्रीमदान्धं पूज्यावमन्तारं च तं दण्डनार्हं मन्वानः 'सर्पो भव' इति शशाप । शापानन्तरमेव स मूढः सर्पतां प्राप्य तस्याः शिबिकाया अवाक्शिराः पपात । सप्तर्षयोऽपि यथाभिलषितं जग्मुः ॥

---

## कथा १६.

विचारकुशलैरेव भाव्यं न्यायाधिकारिभिः ।
अन्यथा परिभूयेरंस्तुरुष्केणेव वादिभिः ॥ २२ ॥

पद्मावत्यां कस्यापि तुरुष्कस्य गृहं कोऽपि तस्करः प्रविश्य सर्वमर्थजातमपाहरत् । अथ स तुरुष्कस्तत्र तत्र तस्करमन्विष्यन्कस्यापि हस्ते स्वकीयमाभरणमेकमपश्यत् । अथ तेनैव सर्वमर्थजातमपहृतमिति जानन्बलाद्गृहीत्वा भूषणहस्तमेव तं न्यायसभामनयत् । नीत्वा च न्यायाधिपस्य पुरतः स्तेयेन तमभियुक्तवान्[1] । अविचारशीलो न्यायाधिपः 'अयमेव तव द्रव्यजातमपाहरदित्यत्र कः साक्षी ?' इति तुरुष्कमपृच्छत् । स तु साक्षी नास्तीति प्रत्यवदत् । तच्छ्रुत्वा 'असाक्षिकोऽयं विवादो न ग्राह्यः' इति प्राड्विवाकेन कथितम् । अनन्तरं वादी तुरुष्कः 'आनीतमाभरणमनालोच्य जाल्मोऽयं साक्षिणमपेक्षते' इति जातकोपस्तस्करं लत्तया प्राहरत् । व्याहरच्च— 'दुरात्मन्, अमुककाले चौर्याय तव गृहमागमिष्यामीति पूर्वमेव कुतो मे न निवेदितम् ? यथा साक्षिणः सुलभा भवेयुः ।' इति । तद्वचनं निशम्य न्यायाधिपो नितरामलज्जत । अतो न्यायवादिभिर्विचारशीलैर्भवितव्यम् ॥

1. 'विभावितैकदेशेन देयं यदभियुज्यते ।' इति कालिदासः ।

## कथा १७.

आत्मनो मुखदोषेण बध्यन्ते शुकशारिकाः ।
बकास्तु नैव बध्यन्ते मौनं सर्वार्थसाधनम् ॥ २३ ॥

तथा च,

सुगुप्तं रक्ष्यमाणोऽपि दारुणं दर्शयन्वपुः ।
व्याघ्रचर्मप्रतिच्छन्नो रासभो वाक्कृते हतः ॥ २४ ॥

अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः । तस्य चैको रासभ आसीत् । सोऽपि घासाभावादतीव दुर्बलोऽभवत् । अथ कदाचित्तेन रजकेन कुत्रापि व्याघ्रचर्म लब्धम् । ततश्चाचिन्तयत् –'अहो समीचीनोऽयमुपायः । यदेतच्चर्म परिधाप्य रासभं रात्रौ यवक्षेत्रेषूत्सृजामि । क्षेत्रपालाश्च व्याघ्रं मन्यमाना नैनं विद्रावयिष्यन्ति' इति । अथ तेन तथानुष्ठिते, रासभो रात्रौ यथातृप्ति यवान्भक्षयति । रजकोऽपि रात्रिशेषे गूढं तं गृहमानयति । एवं गच्छता कालेन स रासभः पुष्टाङ्गः पीवरतनुर्जातः । बन्धनमपि रजकस्य कृच्छ्रसाध्यमभवत् । अथान्येद्यू रात्रौ यवभक्षणं कुर्वन्स मूढो दूरादेव रासभीशब्दं श्रुत्वा भार्यां स्मरन्स्वयमपि शब्दायितुमारब्धः । तच्छ्रुत्वा क्षेत्रपाला रासभोऽयं व्याघ्रचर्मणा प्रच्छन्न इति जानन्तो लगुडप्रहारैस्तं व्यापादितवन्तः । अतो मौनं सर्वार्थसाधनम् ॥

## कथा १८.

धर्मशीला हि पुरुषा लभन्तेऽतर्कितं फलम् ।
स्वर्धेनुर्धर्मशीलस्य विक्रमस्य वशेऽभवत् ॥ २५ ॥

उज्जयिन्यां विक्रमो नाम धार्मिको भूपालो बभूव । तस्य धार्मिकतां परीक्षितुं सुरभिर्महीमाजगाम । आगत्य च कुत्रापि तदागमनमार्गे दुर्बला सती महति पङ्के मग्ना परमं विषाद-मभिनयन्ती स्थिता । विक्रमोऽपि तामालोक्य जातकरुणः सद्यः पङ्कमवगाह्य स्वयमेव तां पङ्कादाकृष्य तीरमनयत् । अथ च शुद्धैर्जलैः प्रक्षाल्य घासमुष्टिं दत्त्वा कण्डूयनादिभिरुपाचरत् । ततस्तस्याव्याजकरुणया प्रीता सा तमाह—'भो धार्मिक, अहं किल सुरभिः । तव धार्मिकतां परीक्षितुं स्वर्गाद्भुवमागता । अनया तव परोपकारदीक्षया परं तुष्टास्मि । वाञ्छितं वरं प्रार्थयस्व ।' इति । अनन्तरं विक्रमस्तां प्रणम्य 'भगवति, यदि तुष्टासि तदद्यारभ्य मम गृहे वस्तुमर्हसि' इति प्रार्थयत । सापि काम-धेनुस्तथेत्युक्त्वा तदाप्रभृति तदीया भूत्वा तस्य गृहे न्यव-सत् ॥

## कथा १९.

**दैवं पुरुषकारेण कोऽतिवर्तितुमर्हति ।**
**बहुपौरुषयुक्तोऽपि कूपान्तः पतितो मृगः[1] ॥ २६ ॥**

मृगग्रहणाय वनेषु पर्यटन्कोऽपि मृगयुर्महतीं वागुरां मृगमार्गे प्रसार्य पुनरागमनाय गतः । गते तस्मिन्मुहूर्तादनन्तरं तरस्वी कोऽपि मृगः स्वच्छन्दं धावंस्तस्यां वागुरायां लग्नपादो बद्धः । अथ महता प्रयत्नेन दन्तैः पाशांश्छित्त्वा कूटरचनामपास्य वागुरां बलाद्भङ्क्त्वा ततो विमुक्तो व्याधभयात्पलायितुमारभत । पलायमानश्च मार्गमध्ये महता दावाग्निना प्रतिबद्धः । अथ तमपि कृच्छ्रेण समुल्लङ्घ्य पुनः पलायनपरोऽभवत् । अत्रान्तरे कोऽपि मृगयुः सरभसमागत्य तदुपरि शरान्प्रावर्षत् । ततो भीतभीतः स मृगो महता वेगेन धावञ्शरगोचरमतीत्य गतः । परं त्वन्ते गभीरे कुत्रापि जीर्णकूपे निपत्य हन्त मृतः । अत एवाहुः 'दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ।' इति ॥

---

1. छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादपि जवेनोत्पत्य धावन्मृगः
कूपान्तः पतितः करोतु विधुरे किं वा विधौ पौरुषम् ॥

## कथा २०.

प्रभुभिः पूज्यते बाल कलैव न कुलीनता ।
कलावान्विक्रमः पूर्वं देवराजेन मानितः ॥ २७ ॥

विक्रमे महीं पालयति जातु देवसभायां रम्भोर्वश्योर्नर्तनं प्रावर्तत । अन्ते तयोर्नर्तननैपुणे विवादः समजायत । तयोरन्तरमवगन्तुममरेषु कोऽपि न शक्तोऽभवत् । तदा नारदो वासवमभाषत–'देव, महीतले विक्रमो नाम राजा वर्तते । स सकलासु कलासु निपुणः । विशेषतो नृत्यकलायाम् । स एवानयोर्विवादं निर्णेतुं प्रभवति ।' इति । तच्छ्रुत्वा महेन्द्रो विक्रममानेतुं सह विमानेन मातलिं प्रेषितवान् । विक्रमोऽपि मातलिना समानीतं विमानमारुह्य सहैव वेतालेन सुधर्मां प्राविशत् । वासवेन च संमानितः समुचित आसने समुपविष्टः । अथ रम्भोर्वश्योः पुनर्नृत्तं प्रावर्तत । अन्ते च विक्रम उर्वश्या नृत्तं विशेषेण प्राशंसत् । नृत्तशास्त्रस्य रहस्यानि सभायामुपन्यस्य जयमुर्वश्यै प्रायच्छत् । अथ पाकशासनः परं संतुष्य मणिमयमतिमनोहरं द्वात्रिंशता सालभञ्जिकाभिरलंकृतं दिव्यं सिंहासनमेकं पारितोषिकं तस्मै दत्तवान् । अथ तदादाय विक्रमो महेन्द्रमापृच्छ्य संतुष्टः सह वेतालेनोज्जयिनीमाजगाम । अतः कलाज्ञानमावश्यकं भवति ॥

## कथा २१.

स्वामिनामुपकुर्वन्ति तिर्यञ्चोऽपि सुपोषिताः ।
शत्रोर्मुखाद्बिडालेन रक्षितो रमणीशुकः ॥ २८ ॥

कापि रमणी मनोरमं कमपि शुकं बिडालं च प्रेम्णा पर्यपोषयत् । तयोः शुकस्तस्यां तथा विस्रब्धोऽभवत् । यथा— तस्या वासगृहं परितः संचरेत् । आसने समुपविशेत् । कराङ्गुलौ नृत्येत् । करतलस्थं च भक्ष्यशकलमाच्छिद्य भक्षयेत् । बिडालोऽपि तया सर्वत्राप्रतिषिद्धसंचारः शुकं च भ्रातरमिव मानयन्नवर्तत । जातु बिडालेनानुगम्यमाना सा रमणी अंसलग्नेन शुकेन सह महानसं प्राविशत् । तदा भूतलगतं किमपि भक्ष्यशकलं दृष्ट्वा शुकस्तदंसाद्भूमिमवातरत् । स तु बिडालः सहसा तं मुखेनादाय सत्वरं भित्तिमारूढः । तादृशं तस्य कृत्यमवलोक्य शुकापायभयेन तस्या मनो यद्यपि कम्पितमभवत् । तथापि तत्क्षणमेव तत्र हेतुं प्रत्यक्षयन्ती सा स्वस्थमानसा जाता । तदा किलागन्तुकः कोऽपि बिडालो महानसे स्थितः । ततोऽमुं रक्षितुमिच्छन्नेवमेष समाचरत् । अथागन्तुके तस्मिन्रमणीं दृष्ट्वा पलायिते, रमणीबिडालोऽपि शुकममुञ्चत् । स चाक्षताङ्गः स्वामिनीमुपजगाम । अतस्तिर्यञ्चोऽपि पोषिताः स्वामिनां बहुधोपकारमाचरन्ति ॥

## कथा २२.

**हन्त केचन वञ्च्यन्ते बुद्धिहीना जनाः शठैः ।**
**मिथ्यास्तुतिं प्रयुञ्जानैः सृगालेनेव वायसः ॥ २९ ॥**

क्षुधया पीडितः कोऽपि जम्बुकः कुत्रापि वने चिरमाहारार्थमटति स्म । अथ श्रान्तः किमप्यलभमानः कस्य चित्तरोर्मूलं गतः । तदानीं कुतोऽपि कोऽपि वायसो मुखेन मांसखण्डमादाय तस्यैव तरोः शाखायामुपविष्टः । तं च दृष्ट्वासौ वञ्चकश्चिन्तयति स्म— 'अहो, वायसस्यास्य मुखस्थं मांसखण्डमतिमनोहरं दृश्यते । तदिमं मूढं स्तुत्या प्रतार्य मांसखण्डमपहरिष्यामि ।' इति । अथ स काकमेवं स्तोतुमारभत— 'भो वायस, त्वं किल विहगानां मध्ये स्पृहणीयगुणोऽसि । तव रूपमतीव रमणीयम् । स्वरस्तु मधुरतरः । मासद्वयात्प्राक् कुत्रापि जम्बूपादपे त्वदीयः स्वरः श्रुतो मया । अतः पुनस्तच्छ्रवणे कुतूहलवानस्मि । तद्गीयतां मुहूर्तम् ।' इति । तच्छ्रुत्वानात्मज्ञः स मूढः सद्यो गातुमारभत । गानारम्भ एव तन्मुखाद्गलितं मांसखण्डं भूमौ पतितम् । तच्चादाय जम्बुकः सपरितोषं भक्षयित्वा तृप्तिमलभत । मूढो वायसस्तु तेनैवं वञ्चितः पुनराहारसंपादनार्थं यथेच्छं गतः ॥

## कथा २३.

ध्रुवं वस्तु परित्यज्य योऽध्रुवं वस्तु सेवते ।
ध्रुवाध्रुवे उभे तस्य विनश्येतां न संशयः ॥ ३० ॥

नागनाथो नाम कोऽपि बालो महोत्सवदर्शनार्थं किंचिन्नगरं प्रस्थितः । वर्त्मनि क्षुधया पिपासया चातीव पीडितोऽभवत् । तडागादीनामभावादुदकमपि दुर्लभं जातम् । सूर्यातपोऽपि कठोरस्तप्यते स्म । अथ नितान्तं श्रान्तः कस्यचिदाम्रतरोर्मूलं प्राप्तः । तत्र किंचिदाम्रफलं पतितं दृष्ट्वा सतृष्णो जग्राह । गृहीत्वा च तदाघ्रायाम्लरसं मन्वानो वृक्षाग्रमवालोकयत् । तत्र श्लाघ्यतमं किंचित्फलं दृष्टम् । तद्दृष्ट्वा सद्यो हस्तगतं फलं दूरतः प्रक्षिप्य वृक्षाग्रस्थं फलं लक्ष्यीकृत्य पाषाणखण्डानि प्राक्षिपत् । परं सर्वाणि तानि लक्ष्यादपराद्धान्यभवन् । पाषाणखण्डान्यपि दुर्लभानि जातानि । अथातीव श्रान्तः 'अहो मूढेन मया वृक्षाग्रस्थं फलमवलोक्य हस्तस्थमपि फलं दूरतः प्रक्षिप्तम् । धिगिमां मदीयां बुद्धिम्' इति वदन्यथेच्छं गतः । अतो यावदध्रुवं वस्तु हस्तगतं न भवति तावद्ध्रुवमर्थं न परित्यजेत् ॥

## कथा २४.

**सापराधोऽपि पुरुषः सत्यवादेन मुच्यते ।**
**पारसीकः सत्यवादी कारागेहाद्विमोचितः ॥ ३१ ॥**

पारसीकेषु सुनन्दाख्यः कोऽपि भूपालो बभूव। स कदाचित्स्वप्रतिनिधिभिर्निगलितान्पुरुषान्द्रष्टुं कारागृहं गतः। तत्र चतुरः पुरुषान्निगलितानपश्यत्। दृष्ट्वा च दयालुः स राजा तानपृच्छत्–'केनापराधेन यूयं निगलिताः?' इति। तेष्वेकः प्रोवाच—'मिथ्यावादिना वादिनो मुख्यसाक्षिणा निरपराधेऽपि मय्यपराध आरोपितः।' इति। द्वितीयः– 'पूर्वमेव प्राड्विवाको मयि जातद्वेषः। तेन निरपराधमपि मां कारां प्रवेशितवान्।' इति। तृतीयस्तु–'व्यवहारतत्त्वं यथावदजानन्न्यायाधिपो मामपराधिनं निर्णीतवान्।' इति। अथ सत्यवादी चतुर्थः प्राह–'महाराज, व्याघ्रपुरे कस्यापि धनिकस्य गृहे धनपेटिकां चोरितवानहम्, अतो न्यायाधिपो मामदण्डयन्।' इति। तच्छ्रुत्वा स भूपालः सापराधमपि सत्यवादिनं तं कारागृहान्मोचयितुं काराध्यक्षमादिशत्। अथ तेन तस्मान्मोचितः सत्यवादी परं संतुष्यन्स्वगृहं प्राप्य सकुटुम्बः सुखमवसत्। तदाप्रभृति चौर्यं चात्यजत्। अतः सत्यवादः सापराधमपि निरपराधं करोति ॥

## कथा २८.

**पिशुनो मानवो लोके नैव क्षेममवाप्नुयात् ।**
**पैशुन्यान्नाशमापन्नः पिशुनो वनगर्दभः ॥ ३२ ॥**

अस्ति ब्रह्मारण्ये करालमुखो नाम केसरी । स कदाचिदाहारार्थं वनेष्वटन्किंचिदस्वस्थशरीरोऽभवत् । तदा परिवारास्तं परिवार्य कैंकर्यमाचरन्तः स्थिताः । तेष्वेकः सोमनामा जम्बुकः परं नागतः । तमनागतं विज्ञाय केसरी परिवारानपृच्छत्— 'कुतोऽद्य सोमो नागतः ?' इति । तदा पिशुननामा वनगर्दभः सविनयं न्यवेदयत्— 'स्वामिन्, अद्य सोमः स्वामिनं रोगेणाभिभूतं तत्र तत्र शंसन्स्वैरं संचरति ।' इति । तच्छ्रुत्वा केसरी सोमे कुपितो जातः । तदेतन्मित्रमुखादवगम्य सोमः पिशुनस्य वधोपायं चिन्तयन्परेद्यवि सिंहसमीपमागतः । सिंहः क्रोधकलुषया दृष्ट्या तमवलोकयन्नपृच्छत्— 'रे, कुतस्त्वं पूर्वेद्युर्नागतः ?' इति । बुद्धिमान्सोमः सविनयमाह— 'महाराज, अस्वस्थो देव इति ज्ञात्वा औषधसंपादनार्थं तत्र तत्र पर्यटन्कथंचिदद्य वैद्यमुखादौषधं ज्ञात्वा समागतोऽस्मि । अतो न मां भक्तिशून्यं मन्तुमर्हति देवः ।' इति । अथ संतुष्टः केसरी 'किं तदौषधम् ?' इत्यपृच्छत् । सोमः 'कोष्णं

वनगर्दभस्य रुधिरम्' इत्याह । अनन्तरं केसरी महता हर्षेण पुरः स्थितं वनगर्दभमेकपातेन समुत्पत्य निशितैर्नखैर्विदार्य यथातृप्ति तद्रुधिरमपिबत् । अतः पैशुन्यं परित्याज्यं भवति ॥

---

## कथा २६.

**खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।**
**कपिना भक्षितं भक्तमजो दण्डमवाप्तवान् ॥ ३३ ॥**

सुमन्दो नाम कोऽपि वृषलः कमपि मर्कटमपोषयत् । स च प्रभूतमाहारमाहरन्पुष्टाङ्गः पीवरः स्थितः । जातु वृषलस्तेनानुगतः पाथेयं दध्यन्नमादाय कार्यवशेन ग्रामान्तरं प्रस्थितः । मार्गे च क्षुधितस्तडागमेकमपश्यत् । अथ कस्यापि वृक्षस्य मूले पाथेयं निक्षिप्य तडागमवतीर्य दन्तानशोधयत् । अत्रान्तरे स दुष्टमर्कटः पाथेयं निःशेषं भक्षयित्वा हस्तलग्नेन दध्ना समीपे स्थितस्य कस्यचिदजस्य मुखं विलिप्य किमप्यजानान इव दूरे स्थितः । वृषलो दन्तान्विशोध्य यावदागत्य पश्यति । तावत्पाथेयं निःशेषं भक्षितं दृष्टम् । अजश्च दध्ना लिप्तमुखः समीपे स्थितः । अनन्तरं स मूढस्तमेवाजं दधिभक्षकं मन्यमानो

दण्डेन प्रहृत्य दिष्ट्या जीवशेषं तं व्यसृजत् । दुष्टाः स्वयमपराध्य निरपराधं साधुं सापराधं प्रदर्शयन्ति । तच्चाविमर्शिनो मूढा यथावदवगच्छन्ति । साधुश्च दण्डमनुभवति । हन्त ! किं क्रियताम् ॥

---

## कथा २७.

[1]उपायं चिन्तयन्प्राज्ञस्तथापायं च चिन्तयेत् ।
पश्यतो बकमूर्खस्य नकुलेन हता बकाः ॥ ३४ ॥

अस्ति कुत्रापि वने बहुबकावासो वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म । स च बकबालकानजातपक्षानपि सदा भक्षयन्कालमनयत् । एवं स्थिते, ह्रस्वग्रीवो नाम कश्चिद्बकः पुत्रशोकेन वैराग्यमापन्नः सरस्तीरमासाद्य बाष्पपूरितलोचनश्चिन्ताकुलः स्थितः । तादृशं तमवलोक्य तीरोपान्ते स्थितः कुलीरकोऽपृच्छत्—'माम, किमेवं रुद्यते भवता ?' इति । स आह 'भद्र किं करोमि ? मन्दभाग्यस्य मम पुत्राः वटकोटरवासिना दुष्टसर्पेण भक्षिताः । तत्कथय मे, यद्यस्ति कश्चिदुपायस्तद्वधे ।' इति । तदाकर्ण्य कुलीरकोऽचिन्तयत्– 'अयं तावदस्माकं सहजवैरी । तद्यथान्येऽपि बका विनश्यन्ति तथोपदेशं प्रयच्छामि ।

1. दुग्धं पश्यति मार्जारः पश्चान्न लगुडाहतिम् ।

उक्तं च—

नवनीतसमां वाणीं कृत्वा चित्तं च निर्दयम् ।
तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा' ॥ इति ।

आह च—'माम, यद्येवं मत्स्यमांसशकलानि नकुलबिलद्वारमारभ्य सर्पकोटरं यावत्प्रक्षिप । एवं कृते नकुलस्तन्मार्गेण गत्वा तं दुष्टसर्पं विनाशयेत् ।' इति । अथ मूढेन तेन तथानुष्ठिते मत्स्यमांसानुसारिणा नकुलेन तं कृष्णसर्पं निहत्य शिष्टा बका अपि शनैः शनैर्निःशेषं भक्षिताः ॥

---

## कथा २८.

न कुर्यान्निष्फलं कर्म य इच्छेद्भूतिमात्मनः ।
अन्यथा प्राप्नुयान्नाशं कीलोत्पाटीव वानरः ३६ ॥

अस्ति मगधेषु विरिञ्चिपुरं नाम किंचिन्नगरम् । तत्र धर्मशर्मा नाम कोऽपि वणिगासीत् । स च नगरासन्ने कुत्रचिदरण्ये देवतायतनं निर्मातुमारभत । तत्र बहवः कर्मकराः कर्मसु नियुक्ताः स्वं स्वं कर्म कुर्वन्ति स्म । कुत्रचिद्दिवसे मध्याह्ने सर्वे शिल्पिनः कर्म कृत्वा भोजनग्रहणाय विरिञ्चिपुरं गताः । तदा यदृच्छया किमपि वानरयूथं तत्र समागतम् । तच्च तत्र स्वेच्छया विहर्तुमारभत । कोऽपि वानरोऽञ्जनदारु-

मयं स्तम्भमारूढः । अर्धस्फाटितस्य तस्याग्रे खादिरः कोऽपि कीलकः सूत्रधारेण प्रवेशित आसीत् । स चासन्नमृत्युः कीशस्तत्रोपविश्य कीलकं हस्ताभ्यां संगृह्य बलादुत्पाटयितुमयतत । तदा स्तम्भमध्यगतवृषणस्य तस्य स्वस्थानाच्चलितेन कीलकेन यत्संवृत्तं तत्प्रागेव प्रोक्तम् । अतो बुद्धिमान्निष्प्रयोजनं कर्म नारभेत । तथा च पठ्यते—

अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च कार्याणि नारभेत विचक्षणः ॥ इति ॥

---

## कथा २९.

[1]अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम् ।
पश्चाद्भजति संतापं ब्राह्मणी नकुले यथा ॥ ३८ ॥

चोलेषु सुशीलो नाम द्विजो बभूव । स चापुत्रो नकुलमेकं सुतमिव प्रीत्यापोषयत् । गच्छता कालेन तस्य भार्यान्तर्वत्नी बभूव । दशमे च मासि वंशकरं सुन्दरं सुतमेकमसूत । अथ स निधिलाभेन निर्धन इव सुतलाभेन कृतार्थमात्मानं मन्यमानो नकुलं दारकं च समानया प्रीत्या समपोषयत् । नकुलोऽपि तं दारकं सहोदरमिव मानयन्सदा तस्य हितमेव समाचरन्न-

---

1. ‘सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।’ इति भारविः ।

वर्तेत। अथ कदाचित्स विप्रः प्रभाते कार्यवशेन ग्रामान्तरं गतः। तत्पत्नी तु प्राभातिकानि गृहकृत्यानि समाप्य स्नानाय प्रतिष्ठमाना शिशुं डोलायां शाययित्वा नकुलं तद्रक्षणाय गृहे निक्षिप्य तडागमगच्छत् । धीमान्नकुलोऽपि शिशुरक्षणे जागरूको डोलायाः समीपे स्थितः । तदानीं करालः कश्चित्कृष्णसर्पः सहसा तत्र समागतः । सहजवैरिणं डोलासमीपमागच्छन्तं च तमेकपातेन गृहीत्वा नकुलः खण्डयामास। अथ च तत्कृत्यं जनन्यै निवेदयितुं तडागाभिमुखमधावत् । स्नात्वोदकुम्भं गृहीत्वा गृहमागच्छन्ती सा रक्तदिग्धमुखं नकुलं मध्येऽवलोक्य तेन शिशोरनिष्टमाशङ्क्य क्रोधमाविश्य तदुपर्युदकुम्भं प्रक्षिप्य तं मारयामास । अथ गृहमागत्य डोलायां सुखेन शयानं सुमुखं सुतं सुतकल्पेन नकुलेन खण्डितं सर्पं च दृष्ट्वा भृशमन्वतप्यत ॥

---

## कथा ३०.

अर्थवानेव पुरुषः सेव्यते मित्रबान्धवैः ।
अर्थहीनस्तु पुरुषः जीवन्नपि मृतोपमः ॥ ३९ ॥

उज्जयिन्यां भद्रसेनो नाम वणिग्बभूव। तस्य पुरंदरो नाम तनयः । तस्य संपदां मर्यादा नासीत् । परं स न व्ययशीलः। कालेन तस्मिन्दिवं गते, पुरंदरः पितुः सर्वस्वं प्राप्य कालोचितं

त्यागं कर्तुमारभत। तथाविधं तं धनदो नाम तस्य सुहृदभाषत–'सखे पुरंदर, वणिक्पुत्रो भूत्वापि महाक्षत्रियकुमार इव व्ययं करोषि। वणिक्कुलसंभवस्य तव नेदं युज्यते। एकाकिनापि वणिक्पुत्रेण द्रव्यसंग्रहः कर्तव्यः। काणवराटिकाया अपि व्ययो न कार्यः।' इति। तच्छ्रुत्वा पुरंदरः प्राह–'सखे धनद, न युक्तमुक्तं भवता। विचार्यमाणे दानभोगाभ्यामर्थः सफलो भवति। पात्रेषु दानेन धर्मो भवति। तेन स्वर्गादयः पुण्यलोकाः प्राप्यन्ते। भोगेन त्विहैव सुखमनुभूयते। अत एव 'दत्तभुक्तफलं धनम्' इति महाभारते पठ्यते। वणिजां मतं त्वज्ञानमूलकमेव।' इति। तच्छ्रुत्वा निरुत्तरो धनदस्तूष्णीं बभूव। ततः पुरंदरः पैतृकं सर्वं धनं क्रमेण सत्पात्रेषु विनियुक्तवान्। अथ वित्तहीनं तं बन्धुमित्रादयो न मानयन्ति स्म। तेन सह गोष्ठीमपि नाकुर्वत। ततश्च खिन्नश्चिन्तयामास—यावद्धस्ते धनमासीत्तावदेव बान्धवाः सुहृदश्च मामसेवन्त। इदानीं तु मया सह गोष्ठीमपि न कुर्वन्ति। नीतिरियं सत्या—

**यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।**
**यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः॥**

इति। एवं विचिन्त्य निर्विण्णो देशान्तरं जगाम।

—*—

# सुभाषितानि ।

---

अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ १ ॥

---

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ २ ॥

रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ३ ॥

स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ॥ ४ ॥

कोकिलानां स्वरो रूपं स्त्रीणां रूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥ ५ ॥

---

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥६॥

मृतो दरिद्रः पुरुषो मृतो यागस्त्वदक्षिणः ।
मृतमश्रोत्रिये दानं मृतं सैन्यमनायकम् ॥ ७ ॥

पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ।
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य हि ॥ ८ ॥

वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम् ।
वृथा च धनिके दानं दारिद्र्ये यौवनं वृथा ॥ ९ ॥

---

अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥ १० ॥

शर्वरीदीपकश्चन्द्रः प्रभातोद्दीपको रविः ।
त्रैलोक्यदीपको धर्मः सुपुत्रः कुलदीपकः ॥ ११ ॥

भार्या मित्रं गृहस्थानां विद्या मित्रं प्रवासिनाम् ।
रोगिणामौषधं मित्रं धर्मो मित्रं शरीरिणाम् ॥ १२ ॥

अर्था गृहे निवर्तन्ते श्मशाने मित्रबान्धवाः ।
सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छति ॥ १३ ॥

---

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ १४ ॥

पादपानां भयं वातः पद्मानां शिशिरो भयम् ।
पर्वतानां भयं वज्रः साधूनां दुर्जनो भयम् ॥ १५ ॥

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥ १६ ॥

दुर्जनः प्रियवादी स्यान्नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥ १७ ॥

---

अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ १८ ॥

ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ १९ ॥

अनभ्यासे विषं शास्त्रमजीर्णे भोजनं विषम् ।
दरिद्रस्य विषं गोष्ठी वृद्धस्य तरुणी विषम् ॥ २० ॥

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ २१ ॥

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ २२ ॥

---

पक्षिणां बलमाकाशं मत्स्यानामुदकं बलम् ।
दुर्बलानां बलं राजा बालानां रोदनं बलम् ॥ २३ ॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रो रक्षति वृद्धत्वे न स्त्री स्वातन्त्र्यमर्हति ॥ २४ ॥

राजवत्पञ्च वर्षाणि दश वर्षाणि दासवत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥ २५ ॥

असंतुष्टो द्विजो नष्टः संतुष्टः पार्थिवस्तथा ।
सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गना ॥ २६ ॥

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं नारी निःस्पृहस्य तृणं जगत् ॥२७ ॥

परोऽपि हितवान्बन्धुः बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ २८ ॥

उत्तमं स्वार्जितं वित्तं मध्यमं पितुरर्जितम् ।
अधमं भ्रातृवित्तं च स्त्रीवित्तमधमाधमम् ॥ २९ ॥

नान्नोदकसमं दानं न द्वादश्याः परं व्रतम् ।
न गायत्र्याः परो मन्त्रो न मातुर्दैवतं परम् ॥ ३० ॥

शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु दाता भवति वा न वा ॥ ३१ ॥

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना नीयते नासौ मामयं प्रार्थयेदिति ॥ ३२ ॥

न वैराग्यात्परं भाग्यं न बोधादपरं सुखम् ।
न हरेरपरस्त्राता न संसारात्परो रिपुः ॥ ३३ ॥

सद्भावो नास्ति वेश्यानां स्थिरता नास्ति संपदाम् ।
विवेको नास्ति मूर्खाणां विनाशो नास्ति कर्मणाम् ॥३४॥

गावो गन्धेन पश्यन्ति वेदेनैव द्विजातयः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ३५ ॥

न विषं भक्षयेत्प्राज्ञो न क्रीडेत्पन्नगैः सह ।
न निन्देद्योगिबृन्दं च ब्रह्मद्वेषं न कारयेत् ॥ ३६ ॥

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ ३७ ॥

राजा राष्ट्रकृतं पापं राजपापं पुरोहितः ।
भर्ता भार्याकृतं पापं शिष्यपापं गुरुर्व्रजेत् ॥ ३८ ॥

घृतेन वर्धते बुद्धिः क्षीरेणायुः प्रवर्धते ।
शाकेन वर्धते व्याधिर्मांसं मांसेन वर्धते ॥ ३९ ॥

त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं स्मर सर्वेश्वरं सदा ॥ ४० ॥

इति प्रथमः स्तबकः ।

## ॥ द्वितीयः स्तबकः ॥

—*—

### कथा १.

शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते ।
युधिष्ठिरः सुखं प्राप्तो नाशं प्राप्तः सुयोधनः ॥१॥

पुरा चन्द्रवंश्यो विचित्रवीर्यो नाम नरपतिरासीत् । स हास्तिनं पुरं पर्यपालयत् । अम्बिका, अम्बालिकेति द्वे भार्ये तस्यास्ताम् । तत्राम्बिकायां धृतराष्ट्रो जातः । अम्बालिकायां च पाण्डुः । धृतराष्ट्रस्य दुर्योधनादयः शतं पुत्रा अजायन्त । पाण्डोश्च युधिष्ठिरादयः पञ्च । बाल्यात्प्रभृति युधिष्ठिरः शुभाचारो बभूव । पापाचारश्च सुयोधनः । बाल्य एव पुत्राणां पाण्डुः कालवशेन परलोकं गतः । अथापि धृतराष्ट्रो बालान्भ्रातृपुत्रान्प्रेम्णा पर्यपोषयत् । दुष्टाशयो दुर्योधनस्तु राज्यहेतोः कर्णादिसहितस्तेषां गूढवधे बहुधा यत्नमकरोत् । परं तेन चिन्तिताः सर्वेऽप्युपाया दिष्ट्या विफला एव जाताः । अथ कपटद्यूतेन तान्पराजित्य देशान्निष्कासितवान् । पापभीरुर्युधि-

ष्ठिरो भ्रातृभिर्भार्यया च सह द्वादश वर्षाणि वने निवासमकरोत् । परैरज्ञातश्च वर्षमेकं विराटनगरे । चतुर्दशे वर्षे दुर्योधनमुपेत्य बलवानपि हन्त स्वदायमयाचत । स तु लोभोपहतचेता अन्ततः पञ्च ग्रामानपि दातुं नानुमेने । अथ तयोर्दारुणं रोमहर्षणं च युद्धं कुरुक्षेत्रे प्रावर्तत । तत्र युधिष्ठिरो भगवतो वासुदेवस्य कृपया सानुजं ससैन्यं दुर्योधनं निःशेषं विनाश्य स्वराज्यमखण्डं प्राप्य सह भ्रातृभिः पृथ्वीं चिरं शशास ॥

---

## कथा २.

भाग्यं फलति सर्वत्र न विद्या न च पौरुषम् ।
कूश्माण्डाभ्यन्तरे मुक्तास्तुरुष्केण विलोकिताः ॥२॥

रात्रौ शय्यागतः कोऽपि भूपतिर्निद्रामलभमानो यत्किंचिच्चिन्तयन्नासीत् । तदानीं तस्य मनस्येवं बुद्धिरुत्पन्ना—

'हरिणापि हरेणापि ब्रह्मणापि सुरैरपि ।
ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते ॥ ३ ॥

इति लोकवादः श्रूयते । किमयं सत्यः स्यात्? अस्य तत्त्वं मया ज्ञातव्यम् ।' इति । ततः प्रभाते शयनादुत्थाय प्राभा-

तिकं कर्मकलापं समाप्य विजने स्थितः कूश्माण्डमेकमादाय तस्मिन्रन्ध्रं कृत्वा मुक्ताभिस्तदापूर्य रन्ध्रं प्रच्छाद्य दरिद्रतमं कंचन ब्राह्मणमाहूय ददौ । तदानीमेव कस्मैचित्तुरुष्काय ताम्बूलिकामूल्यं पादरूप्यं प्रायच्छत् । अथ ब्राह्मणस्तुरुष्कश्च स्वगृहं गन्तुमेकमार्गेण प्रस्थितौ । मार्गमध्ये ब्राह्मणस्तुरुष्कमवदत्—'भोः, प्रतिग्रहलब्धानि बहूनि कूश्माण्डानि मम गृहे सन्ति । तस्मादिदं फलं यस्य कस्यापि विक्रेतुमिच्छामि । तव चेदपेक्षा तत्पादरूप्यदानेन गृह्यतामिदम् ।' इति । तदाकर्ण्य तुरुष्कः पादरूप्यं तस्मै दत्त्वा तत्फलं गृहीतवान् । अथ गृहं गत्वा तत्फलं भित्त्वा तदन्तरे महार्हाणि मुक्ताफलानि विलोक्य प्रहर्षमतुलमलभत । अपरेद्युश्च राजगृहमागत्य सर्वं वृत्तान्तं राज्ञे न्यवेदयत् । राजापि लोकवादः सत्य एवेति सिद्धान्तितवान् । अत एवाहुः—'विधिलिखिताक्षरमालं फलति कपालं न भूपालः ।' इति ॥

---

## कथा ३.

**आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।**
**अन्यथा स्यात्परिभवी दुःखभाक्च न संशयः ॥ ४ ॥**

नवोढभार्यः कोऽपि जामाता कदाचिच्छ्वशुरगृहं गतः ।

श्वशुरः समागतं जामातरमासनदानादिना मानयामास । श्वश्रूश्च जामातुरागमनेन कुतूहलिनी बभूव । जामात्रर्थं षड्रसोपेतं चतुर्विधमन्नं पप्पटादिभिर्विविधैरुपस्कारैः सहितं कल्पयामास । अथ भोजनकाले जामातुस्तिलचूर्णं पर्यवेषयत् । स तु संकोचेन 'अलमलम्' इत्याह । सा च तिलचूर्णं किंचित्परिवेष्य गता । अथ जामाता परिवेषितं तिलचूर्णं स्वादते स्म । तच्च तस्य स्वादुतरमासीत् । जिह्वालौल्यात्पुनस्तत्रापेक्षावानपि संकोचेन प्रतिबद्धः स्वयमपेक्षां नादर्शयत् । भोजनानन्तरं यस्मिन्नुलूखले मुसलेन तिलाश्चूर्णितास्तमुलूखलमपश्यत् । तत्र रन्ध्रेषु तत्र तत्र किंचित्किंचित्तिलचूर्णं दृष्टम् । अथ चपलजिह्वः स विजने स्वयमुलूखले कृच्छ्रेण शिरः प्रवेश्य जिह्वया तत्र तत्र स्थितं तिलचूर्णं सम्यगवलीढवान् । परमन्ते यावदुलूखलाद्बहिः शिरो मोचयति, तावदुलूखलेऽस्य शिरः संलग्नम् । यावच्छक्ति यतमानोऽपि ततः शिरो मोचयितुं न शशाक । हन्त ! स किं कुर्यात् । जिह्वाचापलं हि पुरुषमपराधयति । अथ तस्य श्वशुरादयो मिलित्वा लाघवेनोलूखलात्तमुन्मोचयामासुः ॥

---

## कथा ४.

वञ्चकोऽपि पुमाँल्लोके कदाचिद्वञ्च्यते परैः ।
क्रीडता बालकेनैकस्तस्करोऽभूत्प्रतारितः ॥ ५ ॥

गोपालो नाम बालः कूपस्य समीपे त्रिचतुरैर्मित्रैः सह क्रीडन्नासीत् । तदा कश्चिच्चोरस्तं देशमाजगाम । आगच्छन्तं तमवलोक्य गोपालो यद्यपि भीतः । तथापि बुद्ध्या तं वञ्चयितु-मिच्छन्कूपस्य तीरं गतः । गत्वा च कूपोदकं पुनः पुनः पश्यन्भृशं रुरोद । रुदन्तं बालमुपेत्य स तस्करः 'रे बाल, कि-मेवं रोदिषि ?' इत्यपृच्छत् । तदा बालः सगद्गदं तमभाषत— 'सुमुख, अमूल्यो मदीयो मुक्ताहारोऽनेन बालेन कूपे प्रक्षिप्तः । हारं विना यदि गृहं गच्छेयं तदा मातापितरौ मां ताडयेताम् । अतः किं करोमि । क्व गच्छामि । यदि त्वमस्मिन्कूपेऽवतीर्य हारमादाय प्रयच्छसि तदा मातापितृभ्यां तव महत्पारितो-षिकं दापयेयम् ।' इति । तच्छ्रुत्वा स मूढस्तद्वाक्यं विश्व-सन्वस्त्रादिकं तीरे निक्षिप्य कौपीनमात्रधारी कूपमवातरत् । बुद्धिमान्गोपालस्तु मित्राण्यक्षिभ्रुवसंज्ञया धावयित्वा स्वयं चोरस्य वस्त्रादिकं गृहीत्वा सत्वरं पलायितः । तस्करस्तु, अगाधे जले चिरमन्विष्यापि हारमलभमानः कूपादुत्तीर्य बालं

स्ववस्त्रादिकं चापश्यँल्लज्जितो विस्मितश्च स्वबुद्धिं निन्दन्बालं च प्रशंसन्यथागतं गतः । साधु चेदमुच्यते— 'अज्ञा एव जनाः प्रायो वञ्च्यन्ते वञ्चकैः शठैः' इति ॥

---

## कथा ५.

मनसा बध्यते जीवो मनसैव विमुच्यते ।
देवदासो गतो बन्धं वेश्यादासो विमोचितः ॥ ६ ॥

अवन्तिपुरे समानवयसौ विप्रावास्ताम् । तौ सदा सह चरन्तौ परमां मैत्रीं परस्परमुपगतौ । तयोरेकः प्रतिदिनं देवालयं गत्वा सप्रदक्षिणं देवं नमस्कृत्य स्तुतिभिः स्तुवन्देवदास इति प्रथां गतः । अन्यस्तु प्रत्यहं वेश्यागृहं गत्वा तां बहुधा सेवमानो वेश्यादास इति प्रथितोऽभवत् । परं तु देवदासः सुहृदं वेश्यादासं सुखिनं मन्यमानः सदा वेश्यामेव मनसा ध्यायन्नासीत् । वेश्यादासस्तु देवदासं पुण्यपुरुषं मन्वानः सदा देवे दत्तचित्तोऽभवत् । एवं गच्छति काले, तावुभौ कालधर्मं गतौ । वेश्यादासो मुक्तिमलभत । देवदासस्तु नरकं प्राप्तः । तद्विज्ञाय महामुनिर्नारदो देवसंनिधिं गत्वापृच्छत्—'भगवन्, कोऽयं विपर्ययः? यद्देवदासो बन्धे प्रक्षिप्तः । वेश्यादासश्च बन्धा-

द्विमोचितः' इति । तच्छ्रुत्वा भगवानभाषत—'वत्स नारद, बहिर्वेश्यापरोऽपि वेश्यादासः सदा मय्येव दत्तचित्तोऽभवत् । मामेव सेवमानोऽपि देवदासः सदा वेश्यामेव मनसा ध्यायन्नासीत् । बन्धे मोक्षे च मन एव कारणम् । न बाह्या व्यापाराः । अतो मयैवं कृतम् ।' इति । तच्छ्रुत्वा नारदः समाहितो गतः । साधु चेदमुच्यते—

न काष्ठे विद्यते देवो न पाषाणे न मृन्मये ।
भावे तु विद्यते देवस्तस्माद्भावो हि कारणम् ॥ इति ॥

---

## कथा ९.

द्वेषी मिथः परिजनो निहन्ति स्वामिनो हितम् ।
अन्योन्यकुपितौ शिष्यावभङ्क्तां चरणौ गुरोः ॥ ८ ॥

मथुरानगर्यां सर्वसहो नाम कोऽपि पण्डितो बभूव । तस्य परस्परमत्सरिणौ द्वौ शिष्यावास्ताम् । तयोरेकः प्रत्यहं गुरोर्दक्षिणं पादमभ्यज्य प्राक्षालयत् । अपरो वामं पादम् । जातु दक्षिणपादाभ्यञ्जकः शिष्यो गुरुणा प्रेरितो ग्रामान्तरं कार्यवशेन गतः । तस्मिन्दिनेऽभ्यक्तवामपादं वामपादाभ्यञ्जकं स गुरुः

प्राह ‘अद्य त्वमेव दक्षिणमपि पादमभ्यज्य क्षालय।’ इति। तदाकर्ण्य स मत्सरी प्रत्यवदत्— ‘गुरो, अयं पादो मम विपक्षस्य संबन्धी। तस्मान्नाहमेनमभ्यञ्ज्याम्’। इति। अनन्तरं गुरौ निर्बन्धपरे, जातकोपः स मत्सरी दक्षिणं पादं गृहीत्वा बलाद्बभञ्ज। अन्येद्युर्ग्रामान्तरात्समागतो दक्षिणपादाभ्यञ्जकः शिष्यो गुरोः पादभङ्गं दृष्ट्वा विदितवृत्तान्तः, कोपेन प्रज्वलन्, वामपादाभ्यञ्जकमुच्चावचैः परुषवचनैः शपन्, गुरोर्वाममपि पादं बलादाकृष्य बभञ्ज। एवं भग्नपादद्वयः स गुरुर्महान्तं क्लेशमनुबभूव। अतः,

मिथो मत्सरिणो भृत्या न संग्राह्या बुधैरिह।<br>
भग्नपादः कृतो यस्मात्ताभ्यां सर्वसहो गुरुः॥ ९॥

## कथा ७.

**रहस्यमात्मनो धीमाञ्शत्रुभ्यो न प्रकाशयेत् ।**
**अन्यथा वञ्चितस्तप्येच्चण्डकर्मेव राक्षसः ॥ १० ॥**

अस्ति गोदावर्या दक्षिणे तीरे गहनं किमपि वनम् । तत्र चण्डकर्मा नाम राक्षसः प्रतिवसति । जातु वने भ्रमता तेन कोऽपि ब्राह्मणो दृष्टः । अथ तस्य स्कन्धमारुह्य तमवदत् 'विप्र, नय मामग्रतो दृश्यमानं सरः' इति । विप्रोऽपि भयत्रस्तमना राक्षसं स्कन्धे वहन्प्रस्थितः । गमनसमये कमलकोमलौ राक्षसस्य पादौ दृष्ट्वा विप्रस्तमपृच्छत्— 'महापुरुष, तवेमौ पादौ शिरीषसुकुमारावतिसुन्दरौ भवतः । किं तत्र कारणम्?' इति । सोऽवदत्—'विप्र, अस्ति मे किमपि व्रतम् । यदहमार्द्रपादो न भूमिं स्पृशामि । तेन मम पादौ कोमलौ भवतः'। इति । तच्छ्रुत्वात्मनो मोक्षोपायं चिन्तयन्नेव विप्रस्तत्सरः प्राप्तः । ततो राक्षसेनाभिहितम्— 'विप्र, यावदहं स्नात्वा देवताम-भ्यर्च्य समागच्छामि तावत्त्वयास्मात्स्थानान्न चलितव्यम् ।' इति । विप्रस्तथा करोमीत्याह । अथ स्नातुं प्रवृत्ते राक्षसे, बुद्धिमान्विप्रश्चिन्तयति स्म— 'नूनमयं देवतार्चनानन्तरं मां भक्षयिष्यति । तदद्यैव मया पलायनं कर्तव्यम् । न चायमा-

द्विपादो मूढः पलायमानं मां व्रतभङ्गभयेनानुविधातुं प्रभवति ।’ इति । एवं विचिन्त्य महता वेगेन पलायितः । मूढो राक्षसस्तु तेनैवं वञ्चितो नितान्तमन्वतप्यत ॥

---

## कथा ८.

**नीचः श्लाघ्यं पदं प्राप्य स्वामिनो द्रोहमिच्छति ।**
**मूषिको व्याघ्रतां प्राप्तो महर्षिं हन्तुमुद्यतः ॥ ९ ॥**

अस्ति कस्मिंश्चित्तपोवने परमहंसो नाम मुनिः । स कदाचित्काकेन ह्रियमाणं मूषिकशावकमपश्यत् । दृष्ट्वा च स दयालुः सजीवमेव तं काकाद्विमोच्य नीवारकणैः पोषितवान् । कदाचिल्लम्बकर्णो नाम बिडालस्तं मूषिकं खादितुमुपाधावत् । तं दृष्ट्वा भीतो मूषिको मुनेः क्रोडं प्रविष्टः । बिडालात्तस्य भयं दृष्ट्वा स मुनिस्तपोबलेन तं मूषिकं बिडालमकरोत् । बिडालतां प्राप्तः स मूषिकोऽपरेद्युः कुक्कुराद्भीतः । तदपि दृष्ट्वा मुनिस्तं सद्यः कुक्कुरो भवेत्याह । अन्येद्युः कुक्कुरभावं प्राप्तः स मूषिको व्याघ्राद्भीतो दृष्टः । अथ तं मुनिर्व्याघ्रमकरोत् । एवं दयालुना महर्षिणा व्याघ्रभावं प्रापितः स मूषिको निर्भयस्तदाश्रमेऽवर्धत । तमवलोक्य ‘मूषिकोऽयं महर्षिणा व्याघ्रः कृतः’ इति जनाः

कथयितुमारभन्त । तां कथामात्मनोऽकीर्त्तिकरीं श्रुत्वा स कृतघ्नो ऽचिन्तयत्—'यावदयं मुनिर्जीवति तावदियं मम कथा न शान्तिमेष्यति। तदेनं व्यापाद्य निरपवादो भविष्यामि।' इति । एवं विचिन्त्यानात्मज्ञः स कृतघ्नो मुनिं हन्तुमुद्यतः । तादृशं तं दृष्ट्वा स महात्मा सद्यस्तं कृतघ्नं मूषिको भवेत्याह । स च मूषिको भूत्वा मुनिना परित्यक्तो दुर्बुद्धिमात्मानं गर्हयन्यथेच्छं गतः ॥

---

## कथा ९.

क्वापि सानुग्रहः शापो महर्षीणां प्रवर्तते ।
अपुत्रः पुत्रवानासीच्छापाद्दशरथः पुरा ॥ १२ ॥

अयोध्याधिपो दशरथो जातु वर्षानिशायां व्यायामकुतूहली सरयूं नदीमन्वगच्छत् । तदा किलातिनिबिडैर्वर्षाजलदैर्जगदन्धकारितमभवत् । तत्र कोऽपि पितृपरिचर्यापरो मुनिकुमारो वृद्धयोरन्धयोश्च मातापित्रोरर्थे कमण्डलुना जलं जग्राह । गाढान्धकारे तत्र देशे किमपि चक्षुषो गोचरयितुमपारयन्स राजा दूरादेव जलग्रहणशब्दं श्रुत्वा हस्तिनं कमपि गर्जन्तमतर्कयत्। अथ स शब्दवेधी शब्ददेशं संलक्ष्य निशितमाशीविषोपमं कमपि

बाणममुञ्चत् । स च जटामण्डलधारिणं वल्कलाजिनवाससं मुनिकुमारं प्राप्य मर्मसु गाढं विव्याध । अथ बाणविद्धस्तपस्वी हा तातेत्याक्रन्दनसह्यो मूर्छितस्तीरोपान्ते भूमौ निपपात । मनुष्यस्येवाक्रन्दध्वनिमाकर्ण्य वज्रेणेव हृदि समाहतो राजा यावत्संनिधाय पश्यति तावन्मुनिकुमारो बाणविद्धो दृष्टः । हन्त! स राजा किं करोतु? धर्मशीलस्य तस्य महात्मनोऽपरिहार्योऽयमधर्मोऽज्ञानात्संवृत्तः । केवलं मृतपुत्र इव पिता नितान्तं शोकसागरे मग्नः । अथासन्नप्राणनिर्याणेन मुनिकुमारेण समुपदिष्टस्तत्पित्रोः सकाशं गत्वा साष्टाङ्गपातं प्रणम्यात्मकृत्यं यथावन्निवेद्य कृताञ्जलिस्तस्थौ । एकपुत्रौ जराजीर्णौ नितान्तमशक्तौ सुतायत्तजीवितौ मुनिदंपती वा किं कुरुताम् । पुत्रशोकेनात्ममरणं संनिहितं निरचिनुताम् । अथ च राजानम् 'पुत्रशोकान्म्रियेथाः' इत्यशपताम् । परं स शापस्तस्य महीपतेः पुत्रहीनस्य सानुग्रह एव बभूव । एवं प्राप्तशापः स भूपोऽवश्येन तच्छापेनात्मनः पुत्रोत्पत्तिं तया चात्मनः कृतार्थतां मन्यमानो निजनगरं जगाम । क्रमेण च विभण्डकसुतस्य ऋश्यशृङ्गस्य प्रसादेन पुत्रेष्टिमनुष्ठाय रामादींश्चतुरः पुत्रानवाप्य कृतार्थो बभूव ॥

---

## कथा १०.

उपदेशो न दातव्यो यादृशे कीदृशे नरे ।
मूर्खाननुपदिशन्कीशान्पुरा सूचीमुखो हतः ॥ १३ ॥

अस्ति पम्पायास्तीरे महाञ्शाल्मलीतरुः । तस्य शाखायां बहवो विहंगमाः प्रतिवसन्ति । तत्र जातु हेमन्तसमयः प्राप्तः । हेमन्तमेघाश्च क्रमेण प्रवर्षितुमारभन्त । तदानीं वर्षाहताः केऽपि शाखामृगाः शीतवातेन बाधिताः शाल्मलीमूलमागताः । ते शीतत्राणाय वह्निमन्विष्यन्तोऽपि नालभन्त । अथ तैः शाल्मलीमूले वह्निकणसदृशानि गुञ्जाफलानि विकीर्णानि दृष्टानि । तानि च पुञ्जीकृत्य ते मूढा वह्निवाञ्छया फूत्कर्तुमारभन्त । तादृशं तेषां वृथायासमालोक्य शाखास्थितः सूचीमुखो नाम विहगस्तानेवमुपादिशत्— 'भोः किमेवं वृथापरिश्रमः क्रियते? नैते वह्निकणाः । किं तु तत्सदृशानि गुञ्जाफलानि। न च तैः शीतरक्षा भवति। तदन्विष्यतां कोऽपि निर्वातो देशः किमपि गिरिकन्दरं वा । अद्यापि मेघाः साटोपा दृश्यन्ते।' इति । तच्छ्रुत्वा कोऽपि मूर्खो जरठवानरस्तमाह– 'भोः सूचीमुख, किमेवमस्मानप्युपदिशसि । तूष्णीं भव । नो चेत्कुलायभङ्गं विधाय नाशयिष्यामि।' इति । साधु चेदमुच्यते—

वाच्यं श्रद्धासमेतस्य पृच्छतश्च विशेषतः ।
श्रद्धाहीनस्य तु प्रोक्तमरण्यरुदितोपमम् ॥१४॥ इति।

एवं मूर्खवानरस्य वचनं श्रुत्वापि परहितैषी सूचीमुखः पुनरप्युपदेष्टुमारभत । अथ कोपाविष्टो जरठवानरः शाखामुत्प्लुत्य बलात्सूचीमुखं गृहीत्वा शिलायामास्फाल्य गतासुमकरोत् ॥

---

## कथा ११.

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स तप्येन्मूलनाशेन सोमशर्मपिता यथा ॥ १५ ॥

अस्ति कुसुमपुरे स्वभावकृपणो नाम दरिद्रो विप्रः । तेन भिक्षार्जितैः सक्तुभिर्भुक्तशेषैः पूरितो घटः । तं च घटं नागदन्ते लम्बयित्वा रात्रौ शयनगतस्तमेव घटं पश्यन्नचिन्तयत्– 'हन्त घटोऽयं सक्तुभिः पूर्णो वर्तते । यदि दुर्भिक्षं भवति, तदानेन विक्रीतेन रूपकाणां शतं लभ्येत । तेन मयाजाद्वयं क्रेतव्यम् । ताभ्यां च षाण्मासिकप्रसवाभ्यां महद्यूथं भविष्यति । तेन विक्रीतेन सुवर्णशतं लभ्येत । ततश्च तेन बडबायुगलं क्रेतव्यम् । ताभ्यां बहवोऽश्वाः प्रसूयेरन् । तेषां

विक्रयात्प्रभूतं सुवर्णं भविष्यति । तेन चतुःशालं गृहं संपद्यते । अनन्तरं कश्चिद्ब्राह्मणः स्वयमेव मम गृहमागत्य सुरूपां सुशीलां कन्यां प्रयच्छेत् । तस्यां मम पुत्रो भविष्यति । तस्य सोमशर्मेति नाम करिष्यामि । स च द्विहायनो जानुचङ्क्रमणसमर्थो भवेत् । कदाचिदहमश्वशालायामुपविश्य पुस्तकमवलोकयेयम् । तदा जानुचरो बालकः सकुतूहलं मामुपगच्छेत् । ततोऽहं जातकोपो भार्यां वदिष्यामि 'गृहाणैनं बालकम् ।' इति । सापि गृहकृत्यव्यग्रा सद्यो मम वचनं न करिष्यति । अनन्तरमहं कुपितः समुत्थाय पादाभ्यां तां प्रहरेयम् ।' इति । एवं चिन्तयता तेन मूढेन तथा पादप्रहारो दत्तः ; यथा सक्तुपूर्णो मृद्घटः शतधा भग्नः । अथ नष्टमूलधनो विप्रो महतानुतापेन पीडितोऽभवत् ॥

---

## कथा १२.

केचित्स्वभृत्यैर्वञ्च्यन्ते प्रभवोऽप्यबहुश्रुताः ।
भाषान्तरापरिज्ञानात्त्रैलिङ्गधनिको यथा ॥ १६ ॥

त्रिलिङ्गदेशे दामोदरो नाम कश्चन धनिको बभूव । स च त्रैलिङ्गीमेकामेव भाषां जानाति । तस्य गणकस्तु त्रैलिङ्गीं

द्राविडीमन्याश्च द्वित्रा भाषाः सम्यग्जानाति । जातु द्रविडः कश्चिदैन्द्रजालिकः प्रभोर्दामोदरस्य पुरतो निजं कलाकौशलमदर्शयत् । तच्च दृष्ट्वा संतुष्टो धनिकः 'ऐन्द्रजालिकाय दश पणा दीयन्ताम्' इति गणकमादिशत् । स तु तथेत्युक्त्वा तमैन्द्रजालिकं कोशागारं नीत्वा पणमेकं तस्मै दत्त्वा नव पणान्स्वयमपाहरत् । ऐन्द्रजालिकस्तु प्रभुसमीपमागत्य 'प्रभो, एकमेव पणं गणकः प्रादात्' इति द्राविडभाषया भाषमाणः पणं तस्मै प्रादर्शयत् । द्राविडीमजानानः स धनिको गणकमाहूय 'किमेष भाषते?' इत्यपृच्छत् । स तु धीमानेवं त्रैलिङ्ग्या प्रत्यभाषत— 'स्वामिन्, भवता दत्तेषु दशसु पणेषु काणमेनं पणमादायान्यो दीयतामिति विज्ञापयति ।' इति । तच्छ्रुत्वा प्रभुरैन्द्रजालिकं दानलब्धधेनोर्दन्तपरीक्षकं मन्यमानो धिक्कृतवान् । सोऽप्यतृप्तो विलक्षश्च गतः । अतो बह्वीषु भाषासु परिचयः श्रेयान् ॥

---

## कथा १३.✓

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन ।
निरपेक्षं प्रभुं कृत्वा वने नष्टो बिडालकः ॥ १७ ॥

अस्ति गन्धमादने दुर्दान्तो नाम महापराक्रमः सिंहः ।

तस्य गुहायां निद्राणस्य कोऽपि मूषको बिलादागत्य केसराग्राणि प्रत्यहं छिनत्ति स्म । एवमसकृन्मूषकेण च्छिद्यमानं केसरं ज्ञात्वा स कदाचित्कुपितो जातः । परं बिलगतं तमलभमानः किमपि प्रतिकर्तुमपारयन्नेवं व्यचिन्तयत्—

**क्षुद्रशत्रुर्भवेद्यस्तु विक्रमात्स न लभ्यते ।**
**तमाहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः' ॥१८॥** इति ।

एवं विचिन्त्य कमपि ग्राम्यं बिडालं यत्नेनानीय मांसदानेन तं पोषयन्नरक्षत् । सोऽपि सिंहं स्वामिनं प्राप्य निर्भयो गुहाया-मवसत् । मूषकश्च बिडालभयेन न बिलान्निःसृतः । तेन सिंहो निश्चिन्तो निद्रासुखमन्वभवत् । अथ कदाचित्क्षुधया पीडितो मूषकोऽगत्या बिलान्निःसरन्बिडालेन गृहीतो भक्षितश्च । तदव-लोक्य कृतघ्नः सिंहो बिडालमनुपयुक्तं मत्वा तस्याहारदाने मन्दादरोऽभवत् । अयमेव च तस्य गुणः, यद्दीनं बिडालं बलान्न भक्षितवान् । अथासावाहाराभावेन दुर्बलो गुहाया निष्क्रम्य ग्रामाय गच्छन्केनापि व्याघ्रेण बलाद्गृहीत्वा भक्षितः ॥

## कथा १४.

**मानभङ्गः परकृतो मानिनां मङ्गलावहः ।**
**अनन्तो मानभङ्गेन पाण्डित्यं परमं गतः ॥ १९ ॥**

चोलेष्वनन्तभट्टो नाम कोऽपि कविरभूत् । स बाल्ये सम्यगनभ्यस्तविद्यः । तस्य द्वित्राः सोदरा अधीतशास्त्रा आसन् । तद्गृहे स्त्रियः पुमांसश्च सदा गीर्वाणभाषया व्यवहरन्ति स्म । कचिद्दिवसे भ्रातृभिः सह भुञ्जानः स भट्टः पत्नीमाह—'दधिमानय' इति । 'दध्यानय' इति प्रयोक्तव्ये 'दधिमानय' इति प्रयोगं श्रुत्वा तद्भ्रातरस्तेषां पत्न्यश्च मन्दं जहसुः । साकूतः स हासस्तस्य तत्पत्न्याश्च नितरां लज्जावहोऽभवत् । परं धीमती तत्पत्नी पत्युः परिभवमसहमाना तान्प्राह—'भोः, किमेवं युष्माभिर्विहस्यते? मद्भर्त्रा 'दधि मानय' इत्युक्तम् । तत्र दधि, मा, आनय, इति पदच्छेदः । तक्रमानयेति वाक्यार्थः' इति । एवमभिधाय पत्युस्तक्रं पर्यवेषयत् । सोऽपि स्वाज्ञानमूलं पराभवमसहमानोऽव्युत्पन्नमात्मानं गर्हयन्नन्तर्लज्जितस्तेषां मुखमभिवीक्षितुमपारयन्भोजनानन्तरमेव देशान्तरं गतः । साधु चेदमुच्यते—

**प्राणं वापि परित्यज्य मानमेवाभिरक्षतु ।**
**अनित्यो भवति प्राणो मानस्त्वाचन्द्रतारकम् ॥ इति ।**

तत्र च कमपि पण्डितमणिमुपास्य तत्प्रसादेन समधिगतसकलशास्त्रः काव्यनिर्माणधुरीणः कविरजायत । अथ च विद्वत्प्रियस्य कस्यापि महीपतेः सभां गतः। स चास्य निरतिशयं पाण्डित्यं कवित्वं च परिज्ञाय परं संतुष्य बहुधा संमान्य स्वसभायाः प्रधानपण्डितमेनमकरोत् । इत्थं तेन भूपालेन पूजितः कंचित्कालमतिवाह्य बन्धुदर्शनलालसः स्वदेशजिगमिषां राज्ञे न्यवेदयत् । राजापि तं गजेन्द्रमधिरोप्य विविधैर्विद्वद्भिरुदैरलंकृत्य समेलतालं सपरिजनं तं जन्मभूमिं प्रेषयामास । स च परमानन्दतुन्दिलः स्वगृहं प्राप्य बन्धुभिर्बहुमतः पत्न्या सह सुखमवसत् ॥

---

## कथा १८.

व्युत्पन्नबुद्धयो बालास्तुल्यं वाञ्छन्ति वल्लभम् ।
त्यागराजकवेः पुत्री ज्ञानाम्बा धीमती यथा ॥२१॥

विरिञ्चिपुरे त्यागराज इति कोऽपि कविरभूत् । तस्य कमलाम्बा नाम भार्या ज्ञानाम्बा नाम तनया । ज्ञानाम्बा काव्येषु किंचिद्व्युत्पन्नासीत् । तदा सुन्दरेशो नाम विद्यार्थी तत्पितुः सकाशे काव्यं पठति स्म । सा च तस्मै पत्नीत्वेन

दातव्येति तत्पित्रोः संकल्पः । तादृशं तयोः संकल्पं ज्ञात्वा धीमती सा कचिद्दिवसे सुन्दरेशे काव्यं पठति, स्वयमपि पितुः पार्श्वे समुपविश्य शृण्वत्यासीत् । तदा

विहस्य सुमुखी प्राह विजने प्राणवल्लभम् ।
त्वां विहाय कथं गच्छाम्यहमेकाकिनी नदीम् ॥२२॥

इति श्लोकं पठित्वा सुन्दरेशो विहस्येति पदं षष्ठ्यन्तं विहायेति पदं चतुर्थ्यन्तम् अहं कथमिति च पदे द्वितीयान्ते प्रोवाच । व्युत्पन्ना बुद्धिमती च ज्ञानाम्बा तच्छ्रुत्वा पितरं प्राह—'तात,

यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।
अहं कथं द्वितीया स्याद्द्वितीया स्यामहं कथम्' ॥ इति ।

अथ पण्डितः स्वपुत्र्या बुद्धिकौशलं सुन्दरेशस्य बुद्धिमान्द्यं च पर्यालोच्य 'विवाहश्च विवादश्च समयोरेव शोभते' इति न्यायमनुसृत्य पूर्वकृतं संकल्पं निरस्यान्यस्मा अनुरूपाय वराय कन्यां ददौ ॥

---

## कथा १६.

परोक्तं साध्वनाकर्ण्य न युक्तं प्रतिभाषितुम् ।
बहिर्निष्कासितः कोऽपि बधिरः प्रतिकूलवाक् ॥२४॥

कोऽपि बधिरः स्वमित्रं ज्वरार्तं श्रुत्वा तं द्रष्टुमिच्छन्गृहात्प्रस्थितः । पथि गच्छन्नेवमचिन्तयत्—'मित्रसकाशं गत्वा 'अपि सह्यो ज्वरवेगः' इति पृच्छेयम् । 'किंचिदिव सह्यः' इति स प्रतिवदेत् । ततः 'किमौषधं सेवसे' इति पृच्छेयम् । 'इदमौषधं सेवे' इति स प्रतिभाषेत । अनन्तरम् 'कस्ते चिकित्सकः' इति मया पृष्टे, 'असौ मम चिकित्सकः' इति स प्रतिवदेत् । अथ तत्तदनुरूपं संभाष्य मित्रमापृच्छ्य गृहमागमिष्यामि ।' इति । एवं चिन्तयन्मित्रं प्राप्य सादरमपृच्छत्—'मित्र, अपि सह्यो ज्वरवेगः?' इति । 'तथैव वर्तते' इति स प्रत्यवदत् । बधिरः-'भगवतः प्रसादेन तथैव वर्तताम् । कीदृशमौषधं सेवसे?' ज्वरार्तः 'ममौषधं मृत्तिकैव' इत्यवदत् । बधिरः—'तदेव भद्रतरम् । कस्ते चिकित्सकः?' ज्वरार्तः सकोपं 'मम वैद्यो यम एव' । बधिरः 'स एव समर्थः । तं मा परित्यज ।' एवं प्रतिकूलानि वचनानि श्रुत्वा स रोगी दुःसहेन कोपेन समाविष्टः परिजनमादिशत्— 'भोः किमयमेवं क्षते क्षारं प्रक्षिपति । निष्कास्यतामयमर्धचन्द्रदानेन ।' इति । अथ स मूढः परिजनेन गलहस्तिकया बहिर्निःसारितः ॥

---

## कथा १७.

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पश्य वानरमूर्खेण चटका निर्गृहीकृताम् ॥ २५ ॥

अस्ति गोदावर्यास्तीरे गहनं किंचिद्वनम् । तत्र महाञ्शमीपादपस्तिष्ठति । तस्य शाखासु नीडं निर्माय बहवो विहंगमाः सुखं वसन्ति । तेषु गर्भिणी कापि चटका तस्याः प्रियश्चटकश्चावनतायां तस्य तरोः शाखायां सुदृढं नीडं निर्माय सुखं वसतः । एवं सति हेमन्तसमयः प्राप्तः । हेमन्तमेघश्च मन्दं मन्दं वर्षितुमारभत । अत्रान्तरे कश्चन शाखामृगः शीतवाताहतो दन्तवीणां वादयन्वेपमानावयवः शमीतरोर्मूलमागत्योपविष्टः । तादृशं तमवलोक्य तस्य हितमिच्छन्ती चटका प्राह—

हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः ।
शीतेन हन्यसे भद्र कुतो न कुरुषे गृहम् ॥ २६ ॥

इति । तच्छ्रुत्वा मूर्खो वानरः सकोपमाह—

सूचीमुखि दुराचारे रण्डे पण्डितमानिनि ।
नाशङ्कसे प्रजल्पन्ती किं ते मां प्रति चिन्तया ॥२७॥

इति । एवं सकोपमभिहितापि सा भूयोऽपि यथापूर्वं तमुपदेष्टुमारभत । अथ बुद्धिहीनः स शाखामृगस्तदुपदेशमात्माहितम-

जानानः परमं कोपमाविशन्नेकपातेन शमीशाखामारुह्य तस्याः कुलायं शतधा बभञ्ज । अतो मूर्खाणामुपदेशो न कार्यः ॥

---

## कथा १८.

अपराधिनि सत्त्वेऽपि दयां कुर्वन्ति साधवः ।
भार्यापराधिनं रामो व्यमुञ्चद्वायसं पुरा ॥ २८ ॥

सीतया सह दण्डकायां वसन्रामः कदाचिच्छ्रान्तः सीताया अङ्के शयानो निद्रामकरोत् । साध्वी जानकी स्वपन्तं भर्तारमुत्सङ्गेन निश्चलं धारयन्त्यासीत् । तदानीमिन्द्रसूनुर्दुर्बुद्धिर्जयन्तः काकरूपधारी समागत्य मांसलोभात्तस्याः स्तनौ चञ्च्वा विदारितवान् । जानकी तु भर्तुर्निद्राभङ्गभिया कथंचिद्व्यथां सहमाना निश्चलाङ्गी स्थिता । अथ स्वयमेव स्वापात्प्रबुद्धो राघवः काकस्य कृत्यं विलोक्य संजातकोपस्तं हन्तुमिच्छन्किंचित्तृणमभिमन्त्र्य व्यमुञ्चत् । तस्माद्भीतः स दुष्टः पलायितुमारभत । पलायमानमपि तं तदनुद्रवति स्म । तेनानुद्रुतः पितरं शरणं गतः । स तु रामबाणममोघं मन्वानस्तस्मा अभयं दातुं न शक्तोऽभवत् । अथ ब्रह्मर्षीञ्शरणमुपगतः । तेऽप्यभयदा-

नेऽशक्ता अभवन्। एवं [1]दुष्टस्त्रील्लोँकान्संपरिक्रम्य कुत्रापि शरणमलभमानस्तमेव राघवं शरणं गतः। शरणागतवत्सलो राघवस्तु

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ २९ ॥

इति वचनमनुरुध्य वधार्हमपि तमवैकल्येन मोक्तुमिच्छन्नपि स्वब्राणस्यामोघतया तथा कर्तुं न शशाक। अथ स्वाभिमन्त्रितेन तृणेन तदीयमेकं लोचनमपहृत्य तं व्यसृजत्। सोऽपि मुक्तो यथेच्छं जगाम ॥

---

## कथा १९.

वस्तुषु ब्रह्मसृष्टेषु स्थावरेषु चरेषु च।
सफलं दृश्यते सर्वं विफलं नैव दृश्यते ॥ ३० ॥

कोऽपि भूपो विधिसृष्टानां पदार्थानां प्रयोजनविचारे कुतूहली बभूव। स चिरकालविचारेण सर्वं वस्तु सप्रयोजनमेवापश्यत्। परम् 'मक्षिका ऊर्णनाभाश्च कस्मै प्रयोजनाय सृष्टाः?' इति चिरं विचारयन्नपि न ज्ञातुं शशाक। अथानुपयुक्ता एव

1. 'त्रील्लोँकान्संपरिक्रम्य तमेव शरणं गतः।' इति रामायणे।

त इति निश्चित्य तेषां वधविनोदे रसिकोऽभूत् । अथ कदाचिन्महति युद्धे शत्रुभिः पराजितः कांदिशीको भूत्वा क्वचिदरण्ये परिभ्रम्य श्रान्तो रात्रौ कस्यापि वृक्षस्य मूले सुप्तः । तमेनमुपलक्ष्य कोऽपि शत्रुभटः खड्गपाणिर्यावदाजगाम तावदोष्ठे मक्षिकया दष्टः प्रबुद्धः । अथात्याहितमुपस्थितं पश्यन्सहसान्यत्र पलाय्य कस्यांचिद्गुहायां निलीय स्थितः । तदा कश्चिदूर्णनाभो गुहाद्वारं तन्तुजालेन परीतमतनोत् । क्रमेण च प्रभातमासीत् । तदा गुहास्थितो राजा द्वयोः शत्रुभटयोरात्मान्वेषिणोः संलापं श्रुतवान् । तयोरेकोऽवदत्— 'अस्यां गुहायां स निलीनः स्यात्' इति । अपरः प्राह— 'नैतत्संभाव्यते । यत इदं तन्तुजालमनाकुलं दृश्यते । यदि स गुहां प्रविष्टः स्यात्तदेदं तन्तुजालं त्रुटितमाकुलं भवेत् ।' इति । अथ तावुभौ तां गुहां शून्यां निश्चित्य यथागतं गतौ । अनन्तरं स राजा पुनर्जातमात्मानं मन्यमानो बद्धाञ्जलिरीश्वरं तुष्टाव— 'भगवन्, पूर्वेद्युरहं मक्षिकया रक्षितः । अद्य पुनरूर्णनाभेन । विविधैः प्रकारैर्महान्तमुपकारं मानुषाणामुपजनयन्ति ते सृष्टयः । न विफलां तव कांचित्सृष्टिं पश्यामि ।' इति । एवं स्तुत्वा स्वनगरं प्राप्य स राजा प्रजाः पालयन्सुचिरं सुखमुवास ॥

## कथा २०.

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥ ३१ ॥

अस्ति मिथिलोद्याने महांस्तिन्त्रिणीपादपः । तत्र नीडं निर्माय वायसदंपती प्रतिवसतः । अथ गर्भिणी वायसी प्रसूता । तस्याश्च प्रसवानजातपक्षानपि कृष्णसर्पः कश्चित्कोटरादागत्य भक्षितवान् । ततो वायसौ पुत्रशोकान्निर्विण्णौ प्रियसुहृदं सृगालमुपगम्य प्रोचतुः—'भद्र, अस्मदावासस्य तिन्त्रिणीपादपस्य कोटरे दुष्टः कोऽपि कृष्णसर्पः प्रतिवसति । स पूर्वेद्युराहारार्थं बहिर्गतानस्मान्विज्ञाय नीडशायिनोऽस्मद्बालकानजातपक्षानपि हत्वा भक्षितवान् । किं च, अस्माकमपि तत्रत्यानां प्रतिदिनं प्राणसंशयः । तस्माद्यथा स दुष्टो हन्येत, तथा कश्चिदुपायः कथ्यताम् ।' इति । सृगालः प्राह— 'भोः प्रियसुहृदौ, यद्येवं युवां राजाधिष्ठितं किंचिन्नगरं गत्वा प्रमादिनां राजामात्यादीनां गृहान्मुक्ताहारं कनकसूत्रं वा गृहीत्वा तत्कोटरे प्रक्षिपतम् । एवं कृते, भूषणप्रत्याहरणार्थमागतैस्तैरवश्यं तस्य वधो भवेत् ।' इति । तदाकर्ण्य काकी काकश्च तत्क्षणादेव स्वेच्छयोत्पतितौ । काकी किंचित्सरः प्राप्य यावत्पश्यति

तावत्क्वापि राजवनिता मुक्ताहारं तीरे निक्षिप्य जलक्रीडामाचरन्ती दृष्टा । तां दृष्ट्वा संजातहर्षा सा तत्कनकसूत्रं चञ्च्वा संगृह्य स्वावासाभिमुखं प्रतस्थे । ततो राजसेवका गृहीतलगुडा भूमिस्था अपि सत्वरं तामनुययुः । सापि सर्पकोटरे तत्कनकसूत्रं प्रक्षिप्य सुदूरं गत्वा निभृतं स्थिता । राजपुरुषाश्च महता वेगेनानुधाव्य तं वृक्षमारुह्य यावत्पश्यन्ति तावत्कृष्णसर्पः प्रसारितभोगः कोटरमुखे दृष्टः । ततस्तं लगुडप्रहारेण हत्वा कनकसूत्रमादाय स्वस्थानं गताः । वायसदंपती अपि तदाप्रभृति निर्भयौ सुखमूषतुः ॥

---

## कथा २१.

सुहृदां हितकामानां न करोतीह यो वचः ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ३२ ॥

अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कूर्मः । तस्य संकटो विकटश्चेति द्वौ हंसौ स्नेहपात्रमास्ताम् । तौ च प्रत्यहं सरस्तीरमासाद्य तेन सह सुभाषितगोष्ठीं कुर्वाणौ सुखं कालमनयताम् । एवं गच्छति काले, कदाचिदनावृष्टिवशात्स जलाशयः शनैः शनैः शोषं गतः । कूर्मश्च जलाभावेन क्लेशमनुभवन्द्विवैरेव

दिनैः कृशो जातः । अथ तद्दुःखदुःखितौ संकटविकटौ तमेव-मभाषेताम्— 'मित्र, जलाशयोऽयं जम्बालशेषो जातः । तत्कथं भवानत्र वसञ्जीविष्यति । चिन्त्यतां कश्चिदुपायः ।' इति । तच्छ्रुत्वा कूर्मः प्राह– 'प्रियसुहृदौ, युक्तमुक्तं भवद्भ्याम् । इतः परं नात्र क्षणमपि स्थातुं शक्यते मया । अतोऽन्विष्यतां प्रभूतजलं किंचित्सरः । आनीयतां च किंचिल्लघु काष्ठम् । मया काष्ठस्य मध्यदेशे दन्तैर्गृहीते युवां मया सहितं तत्काष्ठं कोटि-भागयोः संगृह्य तत्सरः प्रापयतम् । एवं कृते तत्रास्माकं सुख-जीवनं भवेत् । नान्या गतिः ।' इति । तावूचतुः— 'मित्र, साधु चिन्तितम् । एवं करिष्यावः । परं भवता दष्टकाष्ठेन गमनकाले मौनिना भवितव्यम् । नो चेत्तव काष्ठात्पातो भविष्यति ।' इति । सोऽपि तथेत्याह । अथ तथानुष्ठिते, विहायसा गच्छता कम्बुग्रीवेणाधः किंचित्पुरमवलोकितम् । तत्र ये जनास्ते तथा नीयमानं कम्बुग्रीवं विलोक्य सविस्मयं परस्परं प्रोचुः— 'अहो चक्राकारं किमपि व्योम्नि पक्षिभ्यां नीयते । पश्यत पश्यत ।' इति । अथ तेषां कोलाहलं श्रुत्वा बुद्धिहीनः कम्बुग्रीवः सुहृद्वचनं विस्मृत्य 'क एष कोलाहलः?' इति हंसौ प्रष्टुमिच्छन्नर्धोक्ते काष्ठाद्भूमौ पतित्वा पौरैः खण्डशः कृतो मृतश्च । अतो हितानामुपदेशो नोल्लङ्घनीयः ॥

## कथा २२.

**अज्ञा एव जनाः प्रायो वञ्च्यन्ते वञ्चकैर्नृभिः ।**
**प्राज्ञा न जातु वञ्च्यन्ते सुमतिश्चोलराडिव ॥ ३३ ॥**

चोलेषु सुमतिर्नाम कोऽपि भूपो बभूव । तस्य सभायां बहवो विद्वांस आसन् । स राजा प्रभूतधनदानेन तान्मानयन्विद्वत्प्रिय इति प्रथां गतः । नानाकलासु कुशलाः कलावन्तः प्रत्यहं तत्सभामागच्छन्ति । तेन च यथोचितं मानिता भवन्ति । सत्येवं कदाचित्कोऽपि मिथ्यारसवेदी तत्सभामागतः । तं राजा पप्रच्छ— 'कस्यां कलायां कुशलो भवान्?' इति । स प्राह— 'महाराज, अहं रसवेदी । रजतं ताम्रं सीसमन्यं वा लोहं सुवर्णं कर्तुं शक्तोऽस्मि । इयमस्माकं कुलक्रमागता विद्या ।' इति । वस्तुतः स लोहं सुवर्णं कर्तुं न शक्तः । केवलमज्ञाञ्जनान्प्रतार्य तेभ्यो रजताद्यपहारकः । प्राज्ञो राजाप्यज्ञजनप्रतारकं तं विज्ञाय तस्मै शून्यां कामपि पेटिकां पारितोषिकं प्रायच्छत् । प्रभूतधनदानेन संमानं प्रतीक्षमाणः स वञ्चकः शून्यपेटिकादानेन लज्जितो भूपालमपृच्छत्— 'महाराज, विद्वद्भ्यः प्रभूतं धनं प्रयच्छन्किमेवं मामवमन्यसे?' इति । राजा प्राह— 'रसवेदिन्, भवान्किल सुवर्णादिकं स्वयमेव

स्रष्टुं शक्तः । तादृशस्य भवतः कियदहं दास्यामि । पेटिका तु तादृशसुवर्णादिनिक्षेपणाय दत्ता । तदिमामादाय गम्यताम् ।' इति । तच्छ्रुत्वा स रसवेदी वञ्चकमपि मामयं राजा वञ्चितवानिति मन्वानो लज्जितो यथागतं गतः । साधु चेदमुच्यते– 'वाञ्चकोऽपि पुमाँल्लोके कदाचिद्वञ्च्यते परैः' इति ॥

---

## कथा २३.

दुर्जनाध्युषितं देशं न साधुर्गन्तुमर्हति ।
व्याघ्रेणाधिष्ठितं देशं गत्वा नष्टोऽजबालकः ॥३४॥

ग्रीष्मे सूर्यातपेन तप्तः कोऽप्यजशिशुः पिपासया पीडितो जलं पातुं गिरिनदीमगच्छत् । तत्रोर्ध्वदेशे जलं पिबन्तं भीषणं कमपि शार्दूलं विलोक्य भीतः स्वयं निम्नतरं देशं गत्वा जलं पिबति स्म । तादृशं तं भीरुमवलोक्य नृशंसः स शार्दूलः स्वमनस्येवमचिन्तयत्— 'अहो, अतिबालोऽयमजशिशुः । अस्य मांसं रुधिरं चातीव मधुरं भवेत् । अतः स्वयमेव विगृह्यैनं व्यापाद्य भक्षयामि ।' इति । एवं चिन्तयित्वा निरपराधं तं साधुमेवमभाषत– 'रे दुष्ट, किमेवं निर्भयो

मया पीयमानमुदकं कलुषयसि ?' इति । तदाकर्ण्य भीतभीतः स साधुः सविनयं प्रत्यभाषत—'भोः शार्दूल, किमेवमकारणं कुप्यसि ? ऊर्ध्वे हि देशे तिष्ठति भवान्, अहं तु निम्नदेशस्थः । सत्येवं मया कलुषितमुदकं कथं तव सकाशमागच्छेत् ? यत्तु जलं त्वत्तो वहति तत्किलाहं पिबामि । तन्मा कोपं कुरु ।' इति । तच्छ्रुत्वा स मूर्खस्तदुपरि प्रतिवक्तुमजानानः प्राह—'रे, भवत्वेतत् । त्वं किल षण्मासात्प्राङ्मां निन्दितवानिति श्रुतम् । किं तत्र कारणम् ?' इति । अजबालकः प्रत्यवदत्—'शार्दूल, जातस्य मम मासद्वयमपि न पूर्णम् । सोऽहं षण्मासात्प्राग्भवन्तं निन्दितवानिति कथं युज्यते ?' इति । अथ तस्यापि प्रतिवचनमजानानः स मूढः स्वमौढ्यं गूहमानः प्राह—'अहो विस्मृत्य मयोक्तम् । न त्वं निन्दितवान् । परं तव पिता निन्दितवानिति श्रुतम् । पितृकृतस्य ऋणस्येव तत्कृतस्यापराधस्यापि पुत्र एव प्रतिवादी ।' इति । तदप्याकर्ण्य स बुद्धिमानेवं प्रत्यभाषत—'शार्दूल, किमेवमसंभावितं भाषसे ? मृगाणां हि मातैव ज्ञायते । न पिता, तन्मम पिता भवन्तमशपदिति कथं संभाव्यते ?' इति । एवमजशिशोर्युक्तियुक्तानि प्रतिवचनानि समाकर्ण्य बुद्धिहीनः स शार्दूलस्तस्मिन्कथंचिदप्यपराधं स्थापयितुं नाबुध्यत । अथ 'प्रतिवक्तुम-

जानानः 'शेषं कोपेन पूरयेत् ।' इति न्यायेन कोपमाविश्य कृपणमजबालं व्यापाद्य भक्षितवान् ॥

---

## कथा २४.

**शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणम् ।**
**शब्दहेतुं परिज्ञाय सुमन्त्रो गौरवं गतः ॥ ३५ ॥**

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम् । तत्र सुमतिर्नाम राजा प्रतिवसति स्म । तस्य सुमन्त्रो नाम सचिव आसीत् । स राजा सर्वाः प्रजाः स्वाः प्रजा इव पर्यपालयत् । प्रजाश्च तस्मिन्नत्यन्तमनुरक्ता अभवन् । तस्य पर्वतस्य क्वापि शिखरे घण्टाकर्णो नाम राक्षसो वसतीति जनवादो बहोः कालात्प्रचलति । जातु कुत्रापि घण्टां चोरयित्वा वनमार्गेण पलायमानः कोऽपि चोरो व्याघ्रेण व्यापादितः । तस्य च घण्टा तत्रत्यैर्वानरैर्गृहीता । ते च तामनुक्षणं वादयन्ति स्म । अपरेद्युर्ब्रह्मपुरवासिनो जनाश्चोरं हतं दृष्ट्वा घण्टां च प्रतिक्षणं वाद्यमानां श्रुत्वा परस्परं प्रोचुः—'अहो कुपितो घण्टाकर्णो घण्टां वादयति । मार्गागतांश्च मनुष्यान्व्यापादयति ।' इति । अथ भीताः केचिद्ब्रह्मपुरं परित्यज्यान्यत्र गन्तुमारभन्त । तदेतच्छ्रुत्वा चिन्ताविष्टो

राजा सुमतिः सचिवं सुमन्त्रमभाषत— 'मन्त्रिन्, किमिदानीं क्रियताम्?' इति। मन्त्री प्राह— 'महाराज, शब्दमात्रान्न भेतुं युज्यते। तदहमद्य शब्दहेतुं परिज्ञाय समागच्छामि। पश्चात्प्रतिक्रिया चिन्तनीया।' इति। राजापि तथेत्याह। अथ सुमन्त्रस्तद्वनं गत्वा क्वापि गूढः स्थितः। मुहूर्तात्परं वानरा घण्टां वादयन्तः समागताः। अनन्तरं प्रत्युत्पन्नमतिः स मन्त्री वानरस्पृहणीयानि वन्यानि विविधानि फलानि तन्मध्ये प्राक्षिपत्। ते च घण्टां दूरतः प्रक्षिप्य फलभक्षणे समासक्ताः। अथ घण्टामादाय स धीमान्राज्ञः समीपमागत्य वानरवृत्तान्तं तस्मा अकथयत्। तच्छ्रुत्वा राजा परं संतुष्य सुमन्त्रं बहुधा मानितवान्। तदाप्रभृति पौरा अपि तं गौरवेण मानयन्तो राक्षसभयमप्यत्यजन्॥

---

## कथा २५.

मन्त्रः कार्यानुगो येषां कार्यं स्वामिहितानुगम्।
त एव मन्त्रिणो राज्ञां न तु ये गतपल्लवाः॥ ३६॥

अङ्गेषु सुदर्शनो नाम कोऽपि भूपो बभूव। तस्य बुद्धिसिन्धुर्नाम मन्त्री। जातु कश्चिदारूढिकस्तस्य सभामागतः। तं स

राजापृच्छत्—'दैवज्ञ, अद्यारभ्य कति संवत्सरानहं जीवेयम् ?' इति । सोऽवदत्—'महाराज, अर्वागेव षण्मासाद्भवतो मृतिं तर्कयामि ।' इति । तच्छ्रुत्वा मरणाद्भीतः स राजा चिन्ताकुलोऽभवत् । आहारग्रहणेऽपि तस्य प्रवृत्तिः कुण्ठिता जाता । दिवारात्रं निद्रामपि न याति स्म । तादृशं तं भीरुं मन्त्री प्राह— 'महाराज,

त्रैलोक्यनायको रामो वसिष्ठो ब्रह्मपुत्रकः ।
तेन रामाभिषेकाय मुहूर्तो निश्चितोऽभवत् ॥ ३७ ॥

तन्मुहूर्तेन रामोऽसौ त्यक्त्वा राज्यं वनं गतः ।
सीतापहारोऽप्यभवद्वैरिञ्चिवचनं वृथा ॥ ३८ ॥

द्विजः कोऽयं नृपश्रेष्ठ किंचिज्ज्ञ उदरंभरिः ।
अतोऽस्य वाक्यविश्वासान्नैवं भेतुं त्वमर्हसि' ॥ इति ।

एवं मन्त्रिणो वचनमाकर्ण्यापि धैर्यमलभमानो भूपश्चिन्ताकुल एवाभवत् । राजकृत्येऽपि पराङ्मुखो जातः । अथ स मन्त्री राज्ञो धैर्यमुत्पादयितुमुपायान्तरमपश्यंस्तमेवारूढिकमाकार्यापृच्छत्– 'दैवज्ञ, षण्मासादर्वाङ्महाराजस्य मृतिं तर्कयसि । त्वमितः परं कति वर्षाणि जीवेः ?' इति । दैवज्ञः प्राह— 'पञ्चचत्वारिंशद्वर्षाणि जीवेयम् ।' इति । तच्छ्रुत्वा बुद्धिसिन्धुः

परप्रतारकान्दैवज्ञान्विज्ञाय सद्यः कोशादसिमाकृष्य तस्य शिरश्चिच्छेद। प्राह च राजानम्—'महाराज, आत्मनो मरणकालमनिर्धारयन्नयं मूढः कथं विश्वास्यवचनः ? अतो न भेतुमर्हसि ।' इति । अथ स राजा धैर्यमवलम्ब्य निश्चिन्तोऽभवत् । तस्माद्भूपालैः प्रत्युत्पन्नधियो मन्त्रिणः संग्राह्याः ॥

---

## कथा २६.

विषयेषु सदासक्ता राजकृत्यपराङ्मुखाः ।
भ्रंशयन्ति नृपा राज्यं बाजीराज इव ध्रुवम् ॥ ४० ॥

महाराष्ट्रेषु पेशवे इति ख्याताः केचिद्भूपा आसन् । ते च [1]पुण्यपत्तनमधिवसन्तः प्रजाश्चिरं पर्यपालयन् । तेषां चरमो बाज़ीराजो नाम बहुगुणसंपन्न आसीत् । परं स विषयेषु पूर्णादरो राजकृत्येषु च मन्दादरोऽभवत् । अतः कर्मसचिवस्थाने बहवो नर्मसचिवास्तं पर्यवारयन् । तैस्तस्य मनो विषयेषु सदा समासक्तमभवत् । न कदाचिदपि राजकृत्येषु । एवं विषयोन्मुखे राजकृत्यपराङ्मुखे च तस्मिन्राजनि, अमात्यगणे च

---

1. Poona.

तच्छन्दमनुवर्तमाने, क्रमेण महाराष्ट्रजनपदः शैथिल्यमलभत। तादृशं समयमुपलभ्य रन्ध्रान्वेषिणः सामन्ता अनायासेन तं जनपदमात्मवशमानयन् । एवं विषयपरा राजानो राज्यं शत्रुवशं नयन्ति । अतो राज्यकामा राजानः कामपरा भवितुं नार्हन्ति ॥

---

## कथा २७.

न ह्यविज्ञातशीलस्य प्रदातव्यः परिश्रयः ।
मत्कुणाश्रयदानेन हता मन्दविसर्पिणी ॥ ४१ ॥

अस्ति कस्यचिन्महीपतेर्मनोरमं शयनस्थानम् । तत्र श्वेततरस्य पटयुगलस्य मध्ये मन्दविसर्पिणी नाम यूका प्रतिवसति । सा च तस्य महीपतेर्मधुरतरं रक्तमास्वाद्य सुखेन कालं नयति। एवं सति कस्यांचिद्रात्रावग्निमुखो नाम मत्कुणस्तत्राजगाम । तमवलोक्य विषण्णमानसा यूका प्रोवाच— 'भो अग्निमुख, किमेवमत्र सभयस्थाने समागतोऽसि । यावत्कश्चिद्राजसेवकस्त्वां न पश्यति तावदन्यत्र पलायनं क्रियताम्। अन्यथा तव प्राणा दुर्लभा भवेयुः ।' इति । स आह—'सुमुखि, गृहमागतस्यासाधोरप्येवं वक्तुं न युक्तम् । किं पुनर्मम । अहं हि न कस्याप्यप्रियमाचरामि। न कंचिदपि प्राणिनं हिनस्मि । 'अहिं-

-सा परमो धर्मः' इति महर्षिभ्यः श्रुतवानस्मि। अतो मैवं वद। किं च, एकाकिन्या त्वयास्य भूपतेर्मधुरतरं रक्तमास्वाद्यते। अतस्तवाहं सहायो भवितुमभिलषामि। यद्यथा त्वमाज्ञापयसि तत्तथा करोमि। प्रसीद।' इति। तच्छ्रुत्वा मन्दविसर्पिणी प्राह—'सुमुख, यद्येवं तर्हि ते प्रसीदामि। परमस्य नृपतेर्निद्रावशं गतस्य रक्तं प्रथममहमास्वादयामि। पश्चात्त्वयास्वादनीयम्।' इति। अग्निमुखः प्राह—'भद्रे, यद्यहं जाग्रतस्तस्य रक्तमास्वादयामि यदि वा भवतीमनादृत्य प्रथममास्वादयामि, तदा देवगुरुकृतः शपथो मम भवतु।' इति। एवं तयोः परस्परं वदतोः स राजा तच्छयनमधिरुह्य शयितः। न सुप्तः। अत्रान्तरे जिह्वालौल्यात्स मत्कुणस्तं महीपतिमदशत्। दष्टमात्र एव स राजा सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा परिजनमाह —'अहो परिज्ञायताम्। अत्र प्रच्छादनपटे नूनं मत्कुणो यूका वा तिष्ठति।' इति। अथ तत्र स्थिताः कञ्चुकिनः सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मया दृष्ट्या वीक्षांचक्रिरे। अत्रान्तरेऽन्तर्धानपटुर्मत्कुणः खट्वान्तरं प्रविष्टः। मन्दविसर्पिणी तु वस्त्रसंधिगता तैर्दृष्टा, व्यापादिता च। अत एव

यस्य न ज्ञायते शीलं न कुलं न विचेष्टितम्।
न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः॥ ४२॥

## कथा २८.

दुष्टैरुपद्रुताः शिष्टा रक्ष्यन्ते परमात्मना ।
जरासंधेन संरुद्धा भूपाः कृष्णेन मोचिताः ॥ ४३ ॥

पुरा किल नागायुतबलो जरासंधनामा कोऽपि क्षत्रियो बभूव । स दुरात्मा महावीरान्क्षत्रियान्युद्धे निर्जित्य स्ववेश्मनि निरुध्य मासि मासि कृष्णचतुर्दश्यामेकैकं हत्वा तद्रक्तबलिं भैरवायाकरोत् । एवं सकलजनपदक्षत्रियवधे दीक्षितस्य तस्य दुरात्मनो वधमभिकाङ्क्षन्भगवान्वासुदेवो भीमार्जुनसहितस्तद्गृहं विप्रवेषेण प्रविवेश । स तु तान्वस्तुतो विप्रानेव मन्वानो दण्डवत्प्रणम्य यथोचितमासनेषु समुपवेश्य मधुपर्कदानेन संपूज्य 'धन्योऽस्मि । कृतकृत्योऽस्मि । किमर्थं भवन्तो मद्भवनमागताः? तद्वक्तव्यम् । यद्यदभिलषितं तत्सर्वं भवतां प्रदास्यामि' इत्युवाच । तच्छ्रुत्वा भगवान्वासुदेवः प्रहसन्पार्थिवं तमुवाच— 'भद्र, वयं कृष्णभीमार्जुनाः । युद्धार्थं समागताः । अस्माकमन्यतमं द्वंद्वयुद्धार्थं वृणीष्व ।' इति । सोऽपि महाबलस्तथेति वदन्द्वंद्वयुद्धाय मारुतिं वरयामास । अथ तयोर्भीमजरासंधयोरतिभयंकरं मल्लयुद्धं निरन्तरं पञ्चविंशतिवासरं प्रवर्तते स्म । अन्ते च भगवता कृष्णेन संबोधितः स वायुसूनुस्तस्य शरीरं

द्विधा कृत्वा भूमौ निपातयामास । एवं महाबलं जरासंधं पाण्डुपुत्रेन हत्वा तेन कारागृहीतान्पार्थिवान्वासुदेवो मोचयामास । तेऽपि तं भगवन्तं बहुधा स्तुवन्तः स्वान्स्वाञ्जनपदान्प्रतिपेदिरे । तथा च गीयते —

निहत्य वायुपुत्रेण जरासंधं यदूद्वहः ।
तद्गृहे संनिरुद्धांस्तु मोचयामास पार्थिवान् ॥ ४४ ॥

ते च सर्वे नमस्कृत्य स्तुत्वा च मधुसूदनम् ।
स्वान्स्वाञ्जनपदाञ्जग्मुर्वासुदेवेन रक्षिताः ॥ इति ॥

---

## कथा २९.

करुणावान्परप्राणान्स्वप्राणैस्त्रातुमीहते ।
मांसं कपोतरक्षायै स्वं श्येनाय ददौ शिबिः ॥ १ ॥

उशीनरेषु राजाभूद्धार्मिकः करुणापरः ।
दाता धीरः शिबिर्नाम सर्वसत्त्वाभयप्रदः ॥ २ ॥

परीक्षितुं तस्य धर्ममिन्द्रः श्येनवपुर्धरः ।
मायाकपोतवपुषमाग्निमन्वपतद्द्रुतम् ॥ ३ ॥

श्येनभीतः कपोतश्च शिबेरङ्कं समाश्रयत् ।
मनुष्यवाचा श्येनोऽथ राजानं शिबिमब्रवीत् ॥ ४ ॥

राजन्भक्ष्यमिमं मुञ्च कपोतं क्षुधितस्य मे ।
अन्यथा मां मृतं विद्धि कस्ते धर्मस्ततो भवेत् ॥ ५ ॥

इत्युक्तः श्येनराजेन महाकारुणिकः शिबिः ।
अमुमुक्षन्कपोतं तं श्येनराजमथाब्रवीत् ॥ ६ ॥

श्येनराज भवद्भीत्या मामेष शरणं गतः ।
न त्याज्यस्तद्ददाम्यन्यन्मांसमेतत्समं तव ॥ ७ ॥

एवं महीपतेस्तस्य वाचं श्रुत्वा विहङ्गमः ।
प्रत्युवाच महीपालं जिज्ञासुस्तस्य मानसम् ॥ ८ ॥

यद्येवं तत्समं राजन्नात्ममांसं प्रयच्छ मे ।
भक्षयित्वा तदातृप्ति गमिष्यामि स्वमालयम् ॥ ९ ॥

अथ राजा तथेत्युक्त्वा खड्गमादाय सादरम् ।
आत्ममांसं समुत्कृत्य तुलामारोपयत्स्वयम् ॥ १० ॥

यथा यथा स्वकं मांसमुत्कृत्यारोपयन्नृपः ।
तथा तथा तुलायां स कपोतोऽभ्यधिकोऽभवत् ॥ ११

असकृन्मांसमुत्कृत्य निर्मांसोऽभूद्यदा नृपः ।
तदा श्येनमनस्तृप्त्या आरुरोह स्वयं तुलाम् ॥ १२ ॥

आश्चर्यमेतन्नेत्राभ्यां दृष्ट्वानिमिषचक्षुषः ।
मन्दारपारिजाताद्यैः पुष्पैर्भूपमवाकिरन् ॥ १३ ॥

तौ चेन्द्राग्नी ततस्त्यक्त्वा रूपं श्येनकपोतयोः ।
तुष्टावक्षतदेहं तं राजानं चक्रतुः शिबिम् ॥ १४ ॥

दत्त्वा चास्मै वरानन्यान्बहून्परमदुर्लभान् ।
तत्क्षणादेव तौ प्रीतावन्तर्धानमवापतुः ॥ १५ ॥

---

## कथा ३०.

**अकृत्वा पादयोः शौचं नैव कुर्याज्जपादिकम् ।
पादशौचविहीनं हि प्रविवेश नलं कलिः ॥ १ ॥**

निषधेषु नलो नाम प्रथितः पार्थिवोऽभवत् ।
वीरसेनमहीपालतनुजो धार्मिकः शुचिः ॥ २ ॥

स कदाचित्सरः स्नातुं गतो हंसानवैक्षत ।
अथ जग्राह तेष्वेकं राजहंसं कुतूहलात् ॥ ३ ॥

गृहीतो दिव्यहंसस्तमूचे मानुषभाषया ।
उपकारं महाराज तव कुर्यां विमुञ्च माम् ॥ ४ ॥

विदर्भदेशाधिपतेर्भीमस्य विनयान्विता ।
दमयन्तीति कन्यास्ति स्पृहणीया सुरैरपि ॥ ५ ॥

तस्यास्त्वं सदृशो भर्ता सा भार्या सदृशी तव ।
युवयोस्तुल्यसंयोगे कामदूतो भवाम्यहम् ॥ ६ ॥

तथेति तेन मुक्तः स हंसो गत्वा विहायसा ।
विदर्भदेशं संप्राप्य दमयन्तीमभाषत ॥ ७ ॥

दमयन्ति नलो नाम निषधेष्वस्ति भूपतिः ।
तस्य त्वं यदि भार्या स्याः सफलं जन्म ते भवेत् ॥ ८ ॥

त्वं चासि रत्नं नारीणां नराणां च नलस्तथा ।
विशिष्टाया विशिष्टेन संगमो गुणवान्भवेत् ॥ ९ ॥

विवाहश्च विवादश्च समयोरेव शोभते ।
इत्याहुर्नीतितत्त्वज्ञास्तन्मे वाचं प्रपूजय ॥ १० ॥

तच्छ्रुत्वा दिव्यहंसं सा गत्वा सत्याभिभाषिणम् ।
प्रोवाच न नलादन्यं वृणेऽहं विहगोत्तम ॥ ११ ॥

अनन्यसुलभास्तस्य पार्थिवस्य महात्मनः ।
गुणा मया श्रुताः पूर्वं तस्मान्मां तेन योजय ॥ १२ ॥

अनेन कर्मणा तेऽद्य महत्पुण्यं भविष्यति ।
अन्यथा राजहंस स्यान्मरणं शरणं मम ॥ १३ ॥

इत्युक्त्वा भूषणैर्भैमी भूषयित्वा विहङ्गमम् ।
प्रेषयामास निषधान्सानुरागा नलं प्रति ॥ १४ ॥

ततः प्रस्थाय हंसोऽपि निषधान्प्राप्य तं नलम् ।
आचचक्षे यथावृत्तं यथाकामं जगाम च ॥ १५ ॥

अत्रान्तरे भीमभूपः स्वयंवरमकल्पयत् ।
विवाहार्थं स्वदुहितुर्भूपालाश्च समागताः ॥ १६ ॥

दिक्पाला अपि चत्वारः श्रुत्वा तस्याः स्वयंवरम् ।
नलरूपधराः सद्यः समाजग्मुस्त्वरान्विताः ॥ १७ ॥

अथ स्वयंवरे भैमी पश्यन्ती पार्थिवान्पृथक् ।
नलरूपधरान्पञ्च पुरुषान्प्रत्यवैक्षत ॥ १८ ॥

ततश्च जातसंदेहा धीमती भीमनन्दिनी ।
चतुरस्तेषु पुरुषान्दिक्पालान्निश्चिकाय सा ॥ १९ ॥

अथ जिज्ञासमाना सा वीरसेनसुतं नलम् ।
दिक्पालाञ्शरणं प्राप सुमुखी ध्यानमास्थिता ॥ २० ॥

ते च भक्त्या तया ध्याताः स्वं स्वं रूपमदर्शयन् ।
सा च हारं करधृतं नलकण्ठे न्यवेशयत् ॥ २१ ॥

अथ भीममहीपालस्तयोश्चक्रे यथाविधि ।
विवाहमङ्गलं सद्यः प्रीत्या दुहितृवत्सलः ॥ २२ ॥

ततो नलस्तया सार्कं सुन्दर्या भीमकन्यया ।
निर्विशन्विविधान्भोगान्सुखितो धर्ममाचरत् ॥ २३ ॥

कदाचित्समुपास्यैव संध्यामक्षालिताङ्घ्रिकः ।
सुष्वाप स नलः पानमदेन मुषितस्मृतिः ॥ २४ ॥

तदन्तरं कलिः प्राप्य तस्य देहं समाविशत् ।
दमयन्तीकृते पूर्वं बद्धद्वेषो हि पापधीः ॥ २५ ॥

तेन देहप्रविष्टेन कलिना स नलो नृपः ।
विहाय धर्म्यमाचारमाचचार यथारुचि ॥ २६ ॥

अथ द्यूते हृतैश्वर्यः पुष्करेण दुरात्मना ।
वनं विवेश धर्मात्मा दमयन्त्या तया सह ॥ २७ ॥